मनिवाच्यं हि चेष्टितं इत्याख्याय कथाश्चर्यं वेतालो सस्थितस्तदा सत्रिविक्रमसेनंतं भूयः पप्रच्छ पार्थिवं तदेतयोः कोन्यपते सेनापति[illegible]हीभृतोः सत्वेनवाधिको ब्रूहि पूर्वोक्तः समयस्तु ते इति वेतालतः श्रुत्वा मुक्तमौनः स तं नृपः प्रत्युवाच द्वयो राजा सत्ववानधिकस्तयोः तदाकर्ण्यैव वेतालः साक्षेपंतमभाषत सेनापतिः कथं नात्र राजन्नभ्यधिको वद यस्तथा स्वामिने भक्त्या स्वभार्यां तां तथाविधां सुचिरज्ञाततद्भोगसुखास्वादां प्रापानयत् आत्मानं स्वाग्निसाच्चक्रे तस्मिंश्च ततमागते अनास्वादिततद्भोगस्त्यक्ता तां तु जहौ नृपः वेतालेनेवमुक्तोपि विहस्य स नृपोऽब्रवीत् यद्यप्येवं तथाप्येतत्किं चित्रं कुलपुत्रकः सेनापतिः सभुक्तायत्स्वाम्यर्थे तत्तथाकरोत् प्राणैरपि हि भृत्यानां स्वामिसंरक्षणं व्रतं राजानस्तु मदाध्माता गजा इव निरंकुशाः छिंदंति धर्ममर्यादाशृंखलां विषयोन्मुखाः तेषां ह्युद्रिक्तचित्तानामभिषेकांबुभिः समं विवेको विगलत्यायेनोह्यमान इवाखिलः क्षिप्यत इव चोद्धूय पश्वलचामरमारुतैः छत्रोपरिद्धशास्त्रार्थरजोमशकमक्षिकाः आनपद्धेलक्ष्यं च सूर्यालोको निवार्यते विभूतिवात्योपहता दृष्टिर्मार्गं च नेक्षते तेते च विपदं प्राप्ता मारमोहितचेतसः जगद्विजयिनोपीह राजानो नहुषादयः एष राजा पुनः पृथ्व्या एकच्छत्रोपि यत्तया उन्मादिन्या चपलया लक्ष्मेव न विमोहितः प्राणानपि समंतास्त्वतत्याजन पुनः पदं अमार्गे निदधे धीरस्तदसौ मेऽधिको मतः इत्याकर्ण्य नृपस्यैतस्य वचनं भूपतस्तदंसस्थलाद्वेतालः सहसा स्वमेव स पदं मायाप्रभावाद्ययौ राज्ञाप्यनुसरंस्त्रयैव स पुनः सप्रयत्नेन जवादारब्धो हि सुदुष्करेपि महतां मध्ये विरामः कुतः॥ इति श्रीमहासोमदेवविरचिते कथासरित्सागरे शशांकवतीलंबके चतुर्विंशस्तरंगः॥ इति सप्तदशो वेतालः॥ ततः पितृवने तस्मिन्क्रव्यभक्षिभिरावृते ज्वालाविलोलरसनैर्भैरैरिव चिताग्निभिः गत्वैव तस्यामक्षोभ्यः क्षिपायां शिंशपातरौ सत्रिविक्रमसेनस्तमाससाद नृपः पुनः तत्रापश्यच्च वेतालान्विकृतान्सहृष्टाकृतीन् तलंबमानान्सुबहून्प्रेतकायान्शंकितः अहो किमेतत्किं वाद्य मायी कालं क्षिपत्ययं वेतालो मेन चेद्येषां यास्यंपे नेहदृयमे अतिवाह्यां पे चेद्रात्रिरियं मम गमिष्यति ततो वह्निं प्रवेक्ष्यामि न सहिष्ये तु हास्यतां इति चिंतयतस्तस्य राज्ञो विज्ञाय निश्चयं स

वतुष्टः स वेतालः स्वमायां संजहार तां ॥ ततो हृष्टकमेवात्र वेतालं न्यकलेवरे । अवतार्य गृहीत्वांसे सप्रतस्थे पुनर्नृपः ॥ प्रक्रामंतं च तं भूपः स वेतालो
भ्यभाषत राजन्नो द्विजस्य चित्रं तदिमां मे कथां शृणु ॥ अस्ति गौरीतपल्लीशब्देन त्रिपुरारिणा । असामान्यगुणोत्कर्षं लुब्धेनेव स्वयंकृता भोगवत्यम
रावत्योस्तन्वीयोजयिनी पुरी ॥ उदारसुकृतप्राप्यनानाभोगोपबृंहिता । यस्यां स्तब्धत्वकार्कश्ये कुचेषु वरयोषितां । तासामेव भ्रुवोर्भंगो लोचनेषु
च चापलं ॥ तमो निशासु वक्रत्वं यस्यां कविवरोक्तिषु । मदो दंतिषु जाड्यं च मुक्तामलयजेषु च ॥ तस्यां चंद्रप्रभाख्यस्य राज्ञो मान्यो वज्रस्थतः देव
स्वामी समभूद्विप्रो भूरियज्ञो महाधनः ॥ तस्य कालेन तनयश्चंद्रस्वामीत्यजायत । सोधीतविद्योपि युवा द्यूतैकव्यसनोभवत् ॥ एकदा च द्विज
सुतश्चंद्रस्वामी स कोपि चन द्यूतकारिमहाटिंदाद्यूतेन क्रीडितुं ययौ ॥ आक्षिप्यामः किमत्रेति विपत्तिरिव वीक्षितुं । विक्षिप्तैः कृष्णसारभैः
नेत्रैरक्षैर्निरंतरं ॥ कः साक्षिनो श्रियं यस्य हरत्यप्यलकापतेः । इतीव तन्वती नादान् झल्झलत्कलहस्वनैः ॥ तं प्रविश्य प्रक्रमाद्यन्नक्षैः स
कितवैः सह । वस्त्रादि हारयित्वापि धनमन्यमहारयत् ॥ मृग्यमानं च यन्नादात्तत्तस्तेनैव सभावि तदा तद्भृत्यसहितेन लगुडैः पर्यताड्यत ॥
लगुडाहतसर्वांगः पाषाणमिव निश्चलं । कृत्वा मृतमिवात्मानं तस्थौ विप्रसुतोथ सः ॥ तथैव दिवसान्द्वित्रांस्तत्र तस्मिन्नवस्थिते । क्रुद्धः सस
भ्यस्तिष्ठायां कितवान्स्वानभाषत ॥ श्रितानेनाश्मतातावत्तदेनं क्षिपत क्वचित् । नीत्वांधकूपे निःसत्वं धनं दास्याम्यहं तव ॥ इत्युक्तास्तेन कितवा
वास्तं चंद्रस्वामिनं ततः । अरण्यानिं न्युर्महत्क्षिप्य दूरं कूपगवेषिणः ॥ तत्रैको वृद्धकितवस्तानन्यानेवमभ्यधात् । मृतोयं प्रायशस्तत्किं कूपे क्षि
प्तेनेनाधुना ॥ तदिहैवेनमुज्झित्वा वक्ष्यामः कूप उज्झितं । इति ते तद्वचः सर्वे तथेति प्रतिपेदिरे ॥ ततस्त्यक्त्वा गतेष्वेषु कितवेषु स उत्थितः । चंद्र
स्वामी विवेशात्र शून्यमेकं शिवालयं ॥ तत्र किंचित्समाश्वास्य चिंतयामास दुःखितः । विश्वस्य मायया कृष्टं मुषितः कितवैरहं ॥ तदीदृङ्नग्नः क्व
गच्छामि नग्नोपहतपांसुलः । पिता बंधुः सुहृद्वापि दृष्ट्वा किं हि वदेन्मम ॥ तदत्र प्रविशस्थितोस्मीह भोक्तुं च क्षुत्प्रशान्तये । पश्यामि निर्गत्य कथ,
यतिष्यभोजनं प्रति ॥ इत्यालोचयतस्तस्य सक्रोधस्यात्वरस्य च । मंदीकृतातपोस्ताद्रिं रविस्त्यक्तांबरो ययौ ॥ तावद्भस्मसितदिग्धांगस्तत्रायासिस्म

तापसः महाव्रती जटामूलधरो हर इवापरः सचंद्रस्वामिनं दृष्ट्वा कोसीति परिपप्रच्छ च कृतानस्मात्तु वृत्तांतं प्रकृतं तापसोब्रवीत् वत्स ममेहाश्रमे प्राप्तः स्नुत्वा नो चिंतितोतिथि उदतिष्ठ कृतस्नानो भिक्षाभागं समाहर इत्युक्ते व्रतिना सोथ चंद्रस्वामी जगाद तं विप्रोहं भगवन्भोक्ष्ये भिक्षाभागं कथं तत्र तच्छ्रुत्वा स व्रती स्मित्वा प्रविश्य मठिकां निजां इष्टसंपादिनीं विद्यां सस्मारातिथिवत्सलः सा स्मृतोपस्थितां तां च किं करोमीति वादिनी अनुगृह्यातिथ्यमतिथेः कुरुष्वेति शशास तां तथेत्युक्तेन यानेन सोद्यानं सांगनाजनं परसौवर्णमुत्पन्नं चंद्रस्वामी ददर्श सः विस्मितं च तमभ्येत्य ततो वारांगनाः पुरात् ऊचुरुत्तिष्ठ भद्रेहि स्नाहि भुंक्ष्व जहि श्रमं इत्युक्त्वाभ्यंतरं नीत्वा स्नापयित्वानुलिप्य च ताभिः सदत्तसद्वस्त्रो नीतोन्यन्महासकोत्तमं तत्रांतः स ददर्शैकां प्रधानयुवतिं युवा सर्वांगसुंदरीं धात्रा कौतुकादिव निर्मितां तया स सोत्कयोत्थाय स्वासनार्धोपवेशितः बुभुजे दिव्यमाहारं तयैवात्र समं ततः भुक्तपंचफलैः स्वादुः ताम्बूलसरसेन च पर्यंकशयने भेजे तत्संभोगसुखं निशि प्रातः प्रबुद्धस्त्वपश्यत्तमेवात्र शिवालयं न तां दिव्यांगनां नापि पुरं तच्च परिच्छदं ततः स विप्रो निर्यातं मठिकांतः स्मिताननं पृष्टरात्रिसुखं प्रह्वः तापसं तं व्यजिज्ञपत् त्वत्प्रसादाद्धरा रात्रौ सुषितो भगवन्सुखं किंतु पास्यति मे प्राणान् तया दिव्यस्त्रिया विना तच्छ्रुत्वा स तपस्वी तं हसन्कारुणिकोब्रवीत् इहैवास्व पुनर्नक्तं भविष्यति तथैव ते इत्युक्ते व्रतिना तेन तद्धृत्यैव प्रतिक्षिपं चेचसाम्यत्र सोभुंक्त भोगांस्तांस्तत्प्रसादतः बुद्ध्वा च तेन शनैर्विद्याप्रभावं विधिचोदितः एकदा तापसेन्द्रं तं सप्रसाद्यानुपाचरत् सत्यं कृपा चेद्भगवन्मयि ते शरणागते तद्देतां देहि मे विद्यां यस्या भावोयमीदृशः इति ब्रुवाणं निर्बंधात्प्रत्याह स तापसः असाध्यानवविद्येयं साध्यते तज्जले ह्यसौ तत्र चैषा सृजत्याशु जपतः साधकस्य तत् मायाजालं विमोहाय येन नासिद्धिं न सोश्नुते स हि तत्र पुनर्जातं बालमात्मानमीक्षते ततो युवानमुद्व्यूढदारं जातात्मजं तथा सुहृन्मेयमयं शत्रुरिति मिथ्या संमुह्यति न च स्मरति जन्मेदं न विद्यासाधनक्रियां यस्त्रिरष्टवर्षः सन्गुरुविद्याप्रबोधितः जन्म स्मृत्वा विदित्वा तद्धीरो मायाविजृंभितं तद्दशोप्यत्र उत्तीतेनयैवाग्निप्रवेशनं परं साधयज्जलोत्तीर्णस्सिद्धविद्यः स पश्यति अन्यस्य तु परं विद्या शिष्यस्यैषा न सिद्ध्यति अस्थानार्पणतो याव गुरोरपि विनश्यति मत्सिद्ध्यैव

वृ॰
श्रशं

फलेसिद्धेकिंयगृहेत्णमुनानव मस्तिसिद्धिहान्यासाजानुतवैनदपिनेस्पति एवंतपस्विनोक्तेपिचंद्रस्वामीगृहेत्णः शिक्ष्यामिसर्वमाभूद्दैवंतानेति
तमब्रवीत् ततोस्मैप्रतिपेदेतांविद्यांदातुंसतापसः वृताभ्रितानुरोधेनकिंनकुर्वंतिसाधवः ततोगत्वानदीतीरंसतमाहमहाव्रती वत्सविद्यांजपन्मा
यांपदाद्रक्ष्यसितांतदा मायाग्निमेवप्रविशेविद्ययाबोधितोमया अहंहितावत्स्थास्यामितवैहैवनदीतटे इत्युक्त्वाध्यापयामासतमाचांतंस्तुचिंस्तु
चिः सचेंद्रस्वामिनंविद्यांसम्यक्तांप्रतिनोवरः ततःतीरस्थितेतस्मिन्गुरौमूर्ध्नाप्रणम्यतं चंद्रस्वामीसरभसांतदीमवततारतां तस्यांसतज्जलेवि
द्यांतांजपन्नसहसैवसः तन्मायामोहितोमिथ्यासर्वंविस्मृत्यजन्मतत् वीक्षांतेयावदन्यस्यामुत्पन्नःस्वात्मनःपुरि पुत्रोविप्रस्यकस्यापिवृद्धिंचश
नकैर्गतः कृतोपनयनोधीतविद्योदारानवाप्यच तद्दुःखसुखसंमूढः संवृत्तोसत्यवान्क्रमात् ततश्चावसुतस्नेहस्वीकृतेनतदाचरन् स्थि
तोवहुरतिःसाकंपितृभ्यांबांधवैस्तथा एवंजन्मांतरमिथ्यातस्यानुभवतोचसः कालंप्रबोधिनींविद्यांगुरुःप्राग्युक्तेतापसः सतद्विद्याप्रयोगे
नसद्यस्तेनप्रबोधितः स्मृतात्मानंगुरुंतंचमायाजालमवेतितत् उद्यतोग्निप्रवेशायविद्यासाध्यफलाप्तये पर्यवारिनिषेधद्भिर्वृद्धाप्तगुरुबंधुभिः
वहुधाबोध्यमानश्चतैर्दंयसुखलोलुपः समुपेतचितप्रायात्नदीतीरंसबांधवः दृष्ट्वावृद्धौपितरौभार्याचमरणाद्यतो क्रंदतिबालापत्यानि
सोथमोहादचिंतयत् कष्टंम्रियंतेस्वजनाःसर्वेमविशतोनलं नचजानामिकिंसत्यंगुरोःतद्वचनंनवा तत्किंनप्रविशाम्यग्निमुतनप्रविशा
मिकिं अथवात्तत्कथंमिथ्यासात्संवादिगुरोर्वचः तद्विशाम्यनलंकामंइत्यतःपविमृष्यसः अग्निप्रवेशंविदधे चंद्रस्वामीकिलद्विजः अनु
भूतहिमसंस्पर्शोवह्निश्चसमविस्मयः शांतमायश्चनदीतोयादुत्थायोपययौतटं तत्रस्थितंचदृष्ट्वातंगुरुंनत्वाचपादयोः पृष्टेनचाग्निशैत्यं
तेस्वमुदंतमबोधयत् ततस्तंसगुरुःस्माहवत्सशंकेकृतस्त्वया अपचारोत्रशीतत्वेकथंजातोग्निरन्यथा अदृष्टमेतदेतस्याःविद्यायाःसाध
नेयतः एतद्गुरोर्वचःश्रुत्वाचंद्रस्वामीजगादसः नापचारोमयाकश्चिद्विहितोभगवन्निति ततःसतद्गुरुर्विद्यांजिज्ञासुस्तामस्मरत् नचसावि
रभूत्तस्यनतच्छिष्यस्यतस्यवा नष्टविद्यावथोभौतौविषण्णौजग्मतुस्ततः इत्याख्यायकथामेषवेतालःपृष्टवान्तंभूयः पृथ्वीपतिंत्रिवि

७२४

राम
७१

वे.क. मेप्रार्थनामेकांसहस्रंकाचनस्यते दास्यामितदिमांमह्यंस्वसुतांदेहिकन्यकां किमेतयातवेत्युक्तेहसंन्याप्तेनयाथसः पुनश्चौरोब्रवीन्नास्तिपुत्रोम॰
श्रा.श्रां मगतायुषः नचापुत्रोस्कन्तेलोकांस्तदेषायंममाज्ञया कुतश्चिज्जनयेत्सुतंक्षेत्रजःसभवेन्मम इत्येतांप्रार्थयेतांतुत्ताद्धिधनस्वममेप्सितं तच्छ्रुत्वासा
वणिग्भार्यापिलोभात्तत्प्रत्यपद्यत आनीयचसुतांप्यंतुपाणौचौरस्यतस्यसा एषासुतामयातुभ्यंकन्यादत्तेभ्यपातयत् सोपितद्दुहितुःदत्तयथो॰
क्तोजगादतां गच्छामुष्यवटस्याधःखातात्स्वर्णंगृहाणतत् गतासोर्दाहयितामेदेहंपुत्राद्विसृज्यच अस्थीनितीर्थेसमुन्नीनागच्छेवक्रोलकपु
रे तत्रसूर्यप्रभेराज्ञिसौराज्यसुखितेजने निरुपद्रवनिश्चिन्तास्थास्यसिस्वंयथेच्छया इत्युक्तस्तृषितःपीत्वातयैवोपाहृतंजलं शूलव्यथपथो॰
त्क्रान्तजीवश्चौरोबभूवसः ततोगत्वावणिक्स्त्रीसास्वर्णंवटतरोस्तलात् गृहीत्वासमसुतागुप्तमगाद्बन्धुसुहृद्गृहं ततश्चस्थितावसुप्तातद्दाहयिता
कलेवरंचौरस्यतस्यातीर्थेऽस्थिक्षेपादिकमकारयत् अन्येद्युस्सातुसंध्यायांततोनिर्गत्यसात्मजा प्रयान्तीक्रमशःप्रापसातद्वक्रोलकंपुरं तत्रै
कंवसुदत्त्वात्याद्गृहंक्रीत्वावणिग्वरात् तस्मिन्नुवाससुतयाधनवत्यातयासह तदाचतत्रोपाध्यायोविष्णुस्वामीत्यभूत्पुरे मनःस्वामीतितस्यासीच्छि
ष्योविप्रोतिरूपवान् विद्याभिजनयुक्तोपिसयौवनवशीकृतः तत्रहंसावलीनामयाचितस्सविलासिनी साचसौवर्णदीनारशतपंचकमग्रहीत
भाटिंतस्यचतत्राभूद्यापीदत्तेनसोन्वहं एकदाचतमद्राक्षीत्तादृशंसावणिक्सुता सोमाभिरामवपुषंधनवत्यत्रहर्म्यतः तद्रूपगतचित्ताचभ
र्तुःचौरस्यतस्यसा स्मृत्वातुज्ञांसमीपस्थापुत्रीगोचरमागतं एवंविप्रस्तुतस्यास्स्वपश्येनेरूपयौवने कीदृशेवतविस्मयस्मनयेनाम्रतवर्षिती
एतच्छ्रुत्वेवतस्मिंस्तांवद्धभावामवेत्यच तन्मातासावणिग्भार्यामनस्येवमचिन्तयत् मद्दुहितानयातावद्दृष्टगीयःसुतान्वये कश्चिद्भर्त्राज्ञया
तस्मादेषैवाभ्यर्थ्यतेनकिं इत्यालक्ष्यव्यसृजत्तत्संदिश्यमनीषिते रहस्यधारिणींचेटींतेमानैस्तुसुताकृते सापगत्वाविजनेनीत्वाचेटीतस्मैशशंस
तत् सचब्रूताद्विजयुवाव्यसनीतामभाषत यदिहंसावलीहेतोर्दीनारशतपंचकं सौवर्णंदीयतेमह्यंतदेकामेमियामिनी इतितेनोक्तयाचे
७२७ ट्यागत्वातथैवसः उक्तावणिक्सुतातस्मैतद्धस्तप्राहिणोद्धनं ततःगृहीत्वामनःस्वामीतत्सुतायावासकंययौ तस्याःसतत्रिस्पृष्टायाधनवत्यासचे राम ७२

क्रमसेनेन मयैवं निगदितः पूर्वोक्तं राजन्संशृणु मे तत्किंपि मम ब्रूहि हेतुना केन विहितेपि यत्नो द्विहेकस्मिन्विद्योभयोस्तयोर्नष्टा एतत्स वेतालवचो
निशम्य नृपस्त्वोवाचन्मनुजेन्द्रवीरः ज्ञानेभवान्मोक्षपतीह कालेयोगीश्वरैवं तदपि ब्रवीमि नदुष्करेणापि हि कर्मणा वशुद्धेन सिद्धिः पुरुषस्य लभ्या
यावन्न निष्कंपविकल्पमस्तु हृद्धीरमनो निर्मलसत्वशुद्धिः तस्मात्स्यमंदस्य तु विप्रपुत्रस्य चित्ते विद्याप्यापि विकल्पते स्म विद्यानसातेन गता स्वसिद्धिम
स्यानदानाद्गुरोर्विनष्टा इति तस्य नृपस्य पृष्टवचो वनवेतालवरो सततः स भूपः निजमेव पदं ययावलक्ष्यो नृपतिस्तं च तथैव सोन्वयासीत् ॥ इ
ति श्रीमहासोमदेवविरचिते कथासरित्सागरे शशांकवतीलंबके पंचविंशतिस्तरंगः ॥२५॥ अष्टादशो वेतालः ॥ अथगत्वा पुनः स्कंधे वेतालं शिंशपाद्रु
मात् सा त्रिविक्रमसेनस्तं गृहीत्वा द्रवचलन्नृपः आगच्छन्च तं भूयः स वेतालोभ्यभाषत राजन्शृण्वेकां मे कां हृद्यां ते कथयाम्यहं अस्ति वक्रोल
कं नाम पुरं सुरपुरोपमं तस्मिन्सूर्यप्रभाख्योभूद्राजा जंभारिसन्निभः सोकरोद्धृतपापस्सानंदं तां वसुंधरां इमां हरिरिवोद्धृत्य यो वभार चिरं भुजे धू
मासंगेस्तु संपातः शृंगारे सरसाः कथाः हास्येषु हेमदंडाश्च यस्य राष्ट्रेभवन्प्रभो सर्वसंपत्समृद्धस्य तस्यैकाभवदनिर्वृतिः नोदपद्यत यत्तस्य पुत्रः स्त्रि
तेष्वंतः पुरेष्वपि एतस्मिंश्च कथासंधौ ताम्रलिप्तामहापुरि वभूव धनपालाख्यो धुर्यो धनवतां वणिक् तस्याचाजायतैकैव नाम्ना धनवती सुता विद्या
धरी च्युता शापात्सौंदर्येणैव सूचिता तस्याश्च यौवनस्थायाः स वणिक्पंचतां ययौ तद्धनं राजसात्राखादाक्रांतमथ गोत्रजैः ततो हिरण्यवत्याख्या वणि
जस्तस्य गेहिनः आदाय रत्नाभरणं निजमप्रकटस्थितं प्रच्छन्नमानया साकं स्वदुहित्रा निशामुखे पलाय्य दायादभयाद्गृहाद्भर्तुर्विनिर्ययौ ध्वांतेन
वहिरंतश्च सा दुःखेनांधकारिता कृच्छ्राद्बहिःपुरं प्राप्य सुता हस्तावलंबिनी तत्र संतमसे यांती विधियोगादलक्षितं अंसेनाताडयच्चौरं शूलाग्रा
रोपितं स्थितं स सजीवस्तदंसाग्रघट्टनाधिकपीडितः आः क्षते क्षारमेतन्मे क्षिप्रं केनेत्यभाषत ततस्तयैव सा कोसीत्यपृच्छत्तं वणिग्वधूः प्रत्युवाच त
तश्चौरः चौरोहमिह संस्थितः शूले पापस्य चाद्यापि नोत्क्रामंति ममासवः तदार्ये त्वं मम ब्रूहि कासि क्वैवं प्रयासि च तच्छ्रुत्वा स वणिग्भार्या यावत्स्वोदं
तमाह सा तावत्तिलकितं प्राच्या मुखमुद्भासितेंदुना ततो दिक्षु प्रकाशासु स चौरः तां वणिक्सुतां दृष्ट्वा धनवतीं कन्यां तन्मातरमुवाच तां शृणु

टिकः तत्रतांविनितोत्कंठः कांतांभूषितभूतलां सचकोरइवज्योत्स्नांददर्शचजहर्षच तयासहचनीत्वातांरात्रिंसंभोगलीलया निर्गत्यचत
तोगुप्तमगात्स्थानंयथागतं सापितस्माद्दिनेवतीसगर्भाभूद्वणिक्सुता कालेनसुषुवेपुत्रंलक्षणानुमितापतिं परितुष्टानदातांचसुतोत्स
वासमानंका आदिदेशरहःस्वप्नेदर्शितस्ववपुर्निशि पुत्रंहेमसहस्रेणनीत्वाबालमुषस्यंतु सूर्यप्रभनृपस्येहमंचस्पद्वारिकुंचलां ए
वंस्नातेममित्युक्ताप्तलिनात्तावणिक्सुता तन्माताचप्रबुद्धोसेतंस्वप्नमन्यान्यसूचतुः नीत्वाचतंतनूजातंतंभगवत्समयाच्छिशुं राज्ञःसूर्य
प्रभाख्यस्यसिंहद्वारेसहेमकं तावच्चतमपिस्वप्नेसुतचिंतातुरंसदा तत्रसूर्यप्रभंभूपमादिदेशवृषध्वजः उत्तिष्ठराजन्बालस्तेसिंहद्वारे
सकांचनः केनापिस्थापितोभव्योसुतकस्यगृहाणतं इत्युक्तःशंभुनाप्रातःप्रबुद्धोपितथैवसः द्वास्थैःप्रविश्यविज्ञप्तोनिर्ययौसनृपतिःस्व
यं दृष्ट्वाचसिंहद्वारेतंबालंसकनकोत्करं रेखाछत्रध्वजाद्यंकापाणिपादस्यमाकृतिं दत्तोममोचितःपुत्रःशंभुनायमितिब्रुवन् स्वयंगृ
हीत्वाद्रुमाराजधानींविवेशसः चकारचोत्सवंतावद्दत्वातमदाहतु दरिद्रशब्दस्यैकस्ययावदासीन्निरर्थता नृत्तवाद्यादिभिर्नीताद्वाद
शाहेततःसतं पुत्रंचंद्रप्रभनाम्नाचक्रेसूर्यप्रभोनृपः ववृधेराजपुत्रोत्रसोपिचंद्रप्रभःक्रमात् वपुषेवगुणौघेनपार्थिवानंददायिना ।
शनैर्युवाचसजज्ञेशौर्योदार्यकृतादिभिः आवर्जितप्रकृतिकःक्ष्माभारोद्वहनक्षमः तादृशंचततोदृष्ट्वातंसूर्यप्रभःपिता राज्येभिषिच्यवृद्ध
नीकृत्तोवाराणसींययौ पृथ्वींशासतितस्मिंश्चनयेनयशालिनि सराजातत्रतत्याजतनुंतीव्रतपस्तनुं श्रुत्वापितृविपत्तिंतांशुशोचकृ
तक्रियः सोथचंद्रप्रभोराजासचिवान्धार्मिकोभ्यधात् तातस्यतावत्केनाहमनृणोभवितुंक्षमः तथाप्येकंस्वहस्तेनदद्यामेतस्यनिष्कृतिं नीत्वा
स्री क्षिपामिगंगायामस्थीन्यस्ययथाविधि गत्वासर्वपितृभ्यश्चगयापिंडंददाम्यहं प्रसंगात्तीर्थयात्रांचकरोम्यापूर्वसागरं इत्युक्तवंतंराजानंमंत्रि
णस्तमजिज्ञपन् नदेवयुज्यतेकर्तुमेतद्राज्ञांकथंचन नहिराज्यंवकाशिकंक्षणंनिष्टस्यरक्षितं तदेषापरहस्तेनकार्यातेपितृसत्क्रिया सप
मंगलनात्स्यातीर्थयात्राचकातव वपुःपायंवृत्पाकुंवनित्यातस्तःकृपार्थिवः इतिमंत्रिवचःश्रुत्वाराजाचंद्रप्रभोब्रवीत् अलंविकल्पैःपित्रर्थं

वृ.क
शशा:

गंतव्यंनिश्चितंमया गंतव्यानिचतीर्थानि यावन्मेक्षमतेवयः पश्चान्मेवेत्तिकिंभाविशरीरेक्षणनश्वरे राज्यंचागमनंयावद्रक्ष्यंयुष्माभिरेवमे कृ
तेतेनिश्चयेराज्ञस्तूष्णीमासतमंत्रिणः ततःप्रयाणसंभारंसज्जंचक्रेसभूपतिः अथाहनिशुभेस्नातोहुताग्निःपूजितद्विजः सयुक्तंरथमास्थायप्र
पन्नःशांतवेशभृत् सामंतान्राजपुत्रांश्चपौरजानपदानपि निवर्त्यानिवृतःकृच्छ्रादासीमानानुयायिनः ब्राह्मणैर्वाहनारूढैःसमंसपुरोहितः
प्रतस्थेसचिवान्यस्तराज्यश्चंद्रप्रभोनृपः विचित्रवेशभाषादिविलोकनविलोभितान् पश्यन्नानाविधान्देशान्क्रमात्प्रापसत्वनैर्दीं ददर्शतांचजं
तूनांजलकल्लोलपंक्तिभिः त्रिदिवारोहसोपानपद्धतिंसृजंतीमिव हिमवत्प्रभवांशंभोःकृतक्रीडाकचग्रहां विभ्रतीमंबिकालीलांदेवदिग्ग
जवंदितां तयावतीर्यतस्यांचकृतस्नानोयथाविधि चिक्षेपास्थीनिभूपस्यतस्यसूर्यप्रभस्यसः दत्त्वादानंकृतश्राद्धोरथारूढस्ततोपिच
प्रस्थितःक्रमशःप्रापप्रयागमृषिसंस्तुतं यत्रार्चिराज्यधूमादिमार्गाविवसमागतौ गंगायमुनयोर्वाहौभातःस्वर्गतयेनृणां तत्रोपो
ष्यकृतस्नानदानादिश्राद्धसत्क्रियः वाराणसींजगामाथसचंद्रप्रभभूपतिः यत्रमोक्षप्रयाणेतिवदंत्यामिवदूरतः वातोत्क्षिप्तसमुत्तिष्ठैःसुर
सद्मध्वजांशुकैः तस्यांदिनान्युपोष्यत्रीण्यभ्यर्च्यचवृषध्वजं भोगैर्निजोचितैस्तत्रप्रययौसगयांप्रति ततःफलघननमितैर्मंजुगुंजद्विहंगमैः
पदेपदेस्तूयमानःसप्रणाममिवांघ्रिपैः विक्षिप्तवन्यकुसुमैरर्च्यमानश्चवानिलैः वनारण्यान्यतिक्रम्यपुण्यंप्रापगयाशिरः विधायतत्रच
श्राद्धंविधिवद्भूरिदक्षिणं चंद्रप्रभःसराजात्रधर्मारण्यमुपेयिवान् गयाकूपेसददतःपितुःपिंडंतदंतरात् समुत्तस्थुस्तमादातुंत्रयोमा
नुषपाणयः तदृष्ट्वासविभ्रांतःकिमेतदितिपार्थिवः कस्मिन्कर्तुंक्षिपेत्पिंडमित्यवोचद्द्विजान् तेतमूचुरयंतावद्धस्तश्चौरस्यनिश्चि
तः एकोलोहमयःशंकुर्यस्मिन्देवैषदृश्यते द्वितीयोब्राह्मणस्यायंकरोधृतपवित्रकः राज्ञःपाणिस्तृतीयोयंसांगुलीयःसुलक्षणः त
त्क्वविप्रःक्वपिंडोयंनिक्षेप्यःकिमिदंभवेत् इत्युक्तोपिद्विजैःसोत्रराजालेभेननिश्चयं इत्याख्यायकथाश्चर्यंवेतालोसस्मितस्तदा सत्रिविक्रम
सेनंतंजगादनृपतिंपुनः तत्कस्यहस्तेदेयःस्यात्सपिंडइतिवक्तुमे भवांस्तावत्सएवात्रप्राक्तनःसमयस्तुते इतिवेतालतःश्रुत्वामुक्तमौनं

७२६

राम
७२

दितः तत्रतांवितन्तोत्कंरः कांतांभूषितभूतलां सचकोरइवज्योत्स्नांददर्शचजहर्षच तयासहचनीत्वातांरात्रिंसंभोगलीलया निर्गमय्यततोगृहमगात्स्नानयथागतं सापितस्माद्दिनेवेलीसगर्भाभूत्हल्लिकत्तुना कालेनसुषुवेवञ्चलक्षणानुमितापतिं परितुष्टेनराज्ञातांचसुतोत्समासमात्रंकृता आदिदेशरहःस्वप्नेदर्शितस्ववपुर्निशि प्रसन्नोहेमसहस्रेणनीताबालमुषसन्नु सूर्यप्रभनृपसेहमंचस्पृहादिदेचतांए वस्याह्नममित्युक्ताशूलिनासावणिक्सुता तन्नाम्नाचप्रबुद्धौतेस्वस्वप्नमन्योन्यमूचतुः नीताचतंतत्पुजनतन्नगवस्त्रस्यपाछिसु राज्ञःसूर्यप्रभाख्यस्यासिंहद्वारेसहेमकं तावच्चतमपिस्वप्नेसुतचिंतातुरंसदा तत्रसूर्यप्रभंभूपमादिदेशवृषध्वजः उत्तिष्ठराजन्बालस्तेसिंहद्वारेसकांचनः केनापिस्थापितोभव्योनुचकस्यगृहाणतं इत्युक्तःशंभुनाप्रातःप्रबुद्धोपितथैवसः द्वाःस्थैःप्रविश्यविज्ञप्तोनिर्ययौनृपतिःस्वयं दृष्ट्वाचसिंहद्वारेतंबालंसकनकोत्करं रेखाछत्रध्वजाद्यंकापाणिपादशुभाकृतिं दत्तोममोचितःपुत्रःशंभुनायमितिब्रुवन् स्वयंगृहीत्वाबाहुभ्यांराजधानींविवेशसः चकारचोत्सवंतावद्यस्मिन्नतमदाहस्तु दरिद्रशब्दस्तैकस्ययावद्दासीत्क्रियंता नृत्तवाद्यादिभिर्नीताद्वादशाहंततःसतं पुत्रंचंद्रप्रभनाम्नाचक्रेसूर्यप्रभोनृपः ववृधेराजपुत्रोत्रसोथचंद्रप्रभःक्रमात् वपुषेणगुणौघेनपाश्रितानंददायिना शनैर्युवावंसजज्ञेशौर्यौदार्यकृतादिभिः आवर्जितप्रकृतिकःक्ष्माभारोद्वहनक्षमः तादृशंचततोदृष्ट्वातंससूर्यप्रभःपिता राज्येभिषिच्यवृद्धोवाराणसींययौ पृथ्वीशासतितस्मिंश्चतनयेनयशालिनि सराजातत्रतत्याजतनुंपत्नीश्चतपस्तनुं उक्तापित्रोर्विपत्तिंतांश्रुत्वाशोचन्कृतक्रियः सोथचंद्रप्रभोराजासचिवान्धार्मिकोभ्यधात् तातस्यतावत्केनाहमनृणोभवितुंक्षमः तथाप्येकांस्वहस्तेनदास्याम्येतस्यनिष्कृतिं नीत्वाक्षपानिगंगायामस्थीन्यस्ययथाविधिः गत्वासर्वपितृभ्यश्चगयापिंडंददाम्यहं प्रसंगात्तीर्थयात्रांचकरोम्यापूर्वसागरं इत्युक्तवंतंराजानंमंत्रिणस्तंव्यजिज्ञपन् नदेवयुज्यतेकर्तुंमेतज्ज्ञात्वाकथंचन नहिराज्यवरुच्छिद्रंक्षणंतिष्ठत्यरक्षितं तदेषापरहस्तेनकार्यातेपित्र्युपक्रिया स्वधर्मपालनादन्यातीर्थयात्राचकातव वक्रपायंकृपाक्रांतंनिम्नातनः क्षपार्थिवः इतिमंत्रिवचःश्रुत्वाराजाचंद्रप्रभोब्रवीत् अलौकिकल्पैःपित्रर्थं

सन्नृपतिः तंत्रिविक्रमसेनोत्रधर्मज्ञःप्रत्यभाषत चौरस्यहस्तेदातव्यःसपिंडःक्षेत्रजोयतः चंद्रप्रभःसन्नृपतिःपुत्रस्तस्यैवनान्ययोः विप्रस्यजनक
स्यापिसहिपुत्रोनतुध्यते विक्रीतोहितेनैनात्मानामैकातेनयामिनी राज्ञःसूर्यप्रभस्यापिसत्काराद्दानवर्धनैः भवेत्सपुत्रोनस्याच्चेत्स्वधनेनतस्यत
त्क्रीते शिशोस्तस्यहिशीर्षान्तेमंचस्यास्यैवहेमयत् न्यस्तमासीत्तदेवास्यमूल्यंसंवर्धनादिके तस्मादुत्पादकःप्राप्तातन्मातायस्ययेनसा प्रोज्झि
तजननीदत्तायस्यनत्रिविलंघने तस्यसक्षेत्रजःपुत्रश्चौरस्यैवमहीपतिः पिंडस्तस्यैवहस्तेचदेयस्तेनेतिमेमतिः इत्युक्तवतोनृपतेस्तस्मात्स्थानात्स्व
पदमेववेतालः सययौसचत्रिविक्रमसेनोराजातमन्वगाद्भूयः॥ इतिश्रीभट्टसोमदेवविरचितेकथासरित्सागरेशशांकवतीलंबकेषड्विंशस्त
रंगः॥२६॥एकोनविंशोवेतालः॥ ततोगत्वागृहीत्वांसवेतालंशिंशपातरोः सत्रिविक्रमसेनस्तमुच्चचालनृपःपुनः मौनेनप्रस्थितंतंचवेता
लस्तमुवाचसः राजन्क्लेशानुबंधोपगच्छरात्रिषुदुर्भज नद्युनेनवनेषुमांसभिक्षोस्तस्यगोचरं गृहीवानवचेदस्तुकथानेकामिमांशृणु अ
स्तिस्वैरवानुक्रान्तवर्णभेदव्यवस्थिति नगरंचित्रकूटाख्यंविख्यातंसत्यनामतः तत्राभून्नरसारस्सारवैरीप्रणायिचक्षुषां चंद्रावलोकइत्यासीद्रा
जाराजशिरोमणिः आलानंशौर्यकरिणस्त्यागस्यान्यासिकेतनं विलासवेश्मकोपस्यशशांकसुभगंविचक्षणः सतोपुसर्वसंपत्सुयत्रप्रापनिजोचिताभा
र्यासैकापराचिंतापूनस्तस्याभवद्धृदि एकदाचनतुहेगविनोदायमहाटवीं जगामासीपसहितोमृगयायैसभूपतिः तत्रसत्करंहृदानिछिदन्वा
लैर्निरंतरैः श्यामलांबरराचिंलुस्तमासीद्वरविक्रमैः शायपंक्षरश्याप्तसिंहान्समरदुर्मदान् दंभोलिककर्कशप्रासपातैर्जघानविक्रमः रस्मादि
विक्षुःसन्नृपोरण्याभ्यंतरमेककः तीव्रपाल्लिंप्रहारेणप्रेरयामाससवाजिनं सवाजीतेनचकषाघातेनोद्वेजितोभृशं पाल्लिघातेनविषमंसमंवागण
यन्क्षणात् वनांतरंततोनैषीद्धानाधिकजवोनृपं मोहितेंद्रियवृत्तिंतंव्यतीत्यदशयोजनीं तत्रतस्मिंस्थितेवाहेराजादिङ्मोहमेत्यसः श्रमंशांतो
ददर्शेकमासन्नंविपुलंसरः मारुतेनाभिमुखेननमितोन्नमितैर्मुजैः इतएहीतिहस्ताभैःसंज्ञाकुर्वदिवांबुजैः तत्रगत्वाचतुरगंविपर्याणपचर्जितं
स्नातपीतंनतच्छायावर्द्धद्रतरोर्न्यरुंधं कृत्वास्वयंकृतस्नानःपीतांबुगालितश्रमः रम्येपुतस्मिन्सादेपुदृशोहृदिभिनस्ततः एकत्रचाशोकतरोःम्र

धस्तान्मुनिकन्यकां आमुक्तशुक्लाभरणां वल्कलांशुकशोभिनीं वहन्तीं जटाजूटं सुविवेशमनोरमां सखीद्वितीयामाश्चर्यभूतां राजा ददर्श सः
अचिंतयच्च पुष्पेषोः पतितः शरगोचरे कैयं स्यादत्र सरसि स्नातुं सावित्री किंस्विदागता किं हरस्याङ्कविभ्रष्टा गौरी भूयः श्रिता तपः अहन्यस्तंगत
स्येन्दोः कान्तिः किं वा धृतव्रता तदेनामुपसृत्यैव हशनेनोपलभे वरं इत्यालोच्य ययौ तस्याः कन्यायाः सोन्तिकं नृपः सापि दृष्ट्वा तमायान्तं नतरूपाञ्ज
लितेक्षणा पूर्वप्रारब्धपुष्पसंकलनं हस्तात्यक्त्वाचिंतयत् कोयमीदृश आरण्येस्मिन् किं ज्योतिर्विद्याधरोनु किं वा नासत्यरूपं विभ्रत्स्वस्य हन्ताधीकर्मणा दृ
शुः एवं वितर्कापश्यन्ती तिर्यक्त्रपया नतः उपायसौ हस्ताभापि गन्तुं प्रावर्तत वसा अथोपेत्य स राजा तामेवं नागरिकोऽब्रवीत् आस्तां प्रथ
मदृष्टस्य दर्शनैकफलार्थिनः जनस्य दूरयातस्य सुंदरि स्वागतादिकं कोयं त्वाश्रमिणां धर्मो यदेतस्मात्पलायते इत्युक्तेऽपरभुजात
स्याः सखी तद्दृष्टिचक्षणा तत्रोपविश्य उन्मत्तेश्चकारातिथिसत्क्रियां अथ स प्रणयं राजा तां सपप्रच्छ सोत्सुकः भद्रे कः पुण्यवान्वंशस्त
स्त्वयालंकृतोनया कानि श्रोत्राणि तत्संदीपस्यानामाक्षराणि वा किंचैवमनया पुण्यसुकुमारमिदं वचः तापसोचितया स्त्यापि विजनेस्मि
न्कदर्थ्यते एतज्ज्ञातो वचः श्रुत्वा तं सखी प्रत्युवाच सा एषा महर्षेः कण्वस्य दुहिता वर्धिताश्रमे मेनकासंभवा कन्या नाम्ना चंद्रीवरप्रभा ए
षास्मिन्सरसि स्नातुमागतानुज्ञया पितुः इतो नातिदूरे हि तस्यैतत्पितुराश्रमः इत्युक्तः स तयाप्राह श्रीराजा कृत्वानुरंगं याचितुं तां सुतां त
स्य कण्वर्षेराश्रमं ययौ विवेश च विनीतस्तं वहिः स्थापितवाहनः जटावल्कलिभिः पूर्णं पादपैरिव तापसैः तन्मध्ये च तमद्राक्षीद्दृषि
भिः परिवारितं तेजसाह्लादिने तारव मुनिं चंद्रमिवग्रहैः उपेत्य पादयोस्तं च ववंदे सोपि तं मुनिः कल्पितातिथ्यविश्रान्तं ज्ञानीक्षिप्रादभाषत व
त्स चंद्रावलोकेन तच्छृणु यद्धृदि स्थितेहितं जानामि यादृक्संसारे प्राणिनां मन्मुनेलोभयं नत्रिक्षुरोऽयमे वै तान्वराकान्कृसि किंस्मतान् शास्त्रेहि भी
तरक्षार्थं धात्रा क्षत्रस्य निर्मितं तत्प्रजारक्षधर्मेण सम्यग्लयकंटकान् हन्त्यशास्त्रादियोग्यादिभिः खललक्ष्म्यादि साधय भुंक्ष्व राज्यसुखं
देहि दानं दिक्षु यशः किर कृतान्तक्रीडितं हिंसं मृगयाख्यसनं त्यज हेतुर्वधस्य वाहस्य यत्र तुल्यप्रमादता किं तेन वकृतं येन पाण्डोरु

त्तं न किं कृतं एतत्काल एव मुनेर्वाक्यं कृत्वा समभिनंद्य सः राजा चंद्रावलोकस्तमर्षिं ततः प्रत्यभाषत अनुशिष्टोस्मि भगवन्कृतो मेनुग्रहः परः मृगयाया निवृत्तोहं प्राणिनः संतु निर्भयाः तच्छ्रुत्वोवाच स मुनिस्तुष्टोहमनेन तव प्राणिष्वभयदानेन तद्वृणीष्वेप्सितं वरं इत्युक्तस्तेन मुनिना कालज्ञः सन्नृपोब्रवीत् तुष्टोसि चेत्सुतां देहि मह्यमिंदीवरप्रभां इत्यर्थितवते तस्मै राज्ञे स्नानागतां मुनिः अप्सरःसंभवां तां च स ददावनुरूपिकां ततः कृतविवाहस्तां मुनिभार्याप्रसादितां कृतानुयात्रामुह्याश्वे स्तापसैरानिजाश्रमात् इंदीवरप्रभां भार्यामादायारुह्य वाजिनं स प्रतस्थे च नृपतिर्मंगलालंकृतस्ततः दूराध्वगमनेक्लांतं वीक्ष्यातं नृपतिं ततः रविः खिन्न इवास्ताद्रिमस्तके समुपाविशत् ददृशे मृगनेत्रा च क्रमाद्दिक्षु तमोमया ध्वांतनीलपटच्छन्नरूपा रात्र्यभिसारिका तस्मिन्काले पथि प्राप स राजाश्वत्थपादपं सजलाशयमस्वच्छजले सापीतटेस्मिन् शाखोपघ्नसंछन्नशाद्वलश्यामलस्थले दृष्ट्वा च तं वसामीह रात्रिमित्यकरोद्धृदि ततोवतीर्य तुरगाद्दत्वा तस्मै तृणोदकं विश्रम्य पुलिने वाप्यानुपभुक्तांबुमारुतः तत्कालं च समाक्रम्य तिमिरांशुकहारिणा सरागेणाननं प्राच्याः चुचुंबे शशलक्ष्मणा विरेजुश्चंद्रकिरणैः समाक्षिप्य प्रसादिता वीतमानावकाशाश्च शेषा वितमसो दिशः अथांतरे लतागुल्मविवरप्रसृतैः करैः ऐंदवैरिव दीपाभैस्तरुमूले च भासिते सोपि राजासिथेवेतन्माक्षिप्येंदीवरप्रभां नवसंगमसोत्कंठसरसं सुरतोत्सवं विस्तारयामास शनैर्नीवीं तस्यास्त्रपामिव अखंडयच्च दशनैर्मुग्धभावमिवाधरं रचयामास कुचयोर्भौवनेद्विपकुंभयोः करजक्षतसद्रत्ननवनक्षत्रमालिकां मुखं कपोलौ नयने मुहुरेव चुचुंब च लावण्यामृतनिष्यंदमापिबन्निव सर्वतः इत्थं निधुवनक्रीडासुखेन सततं तया सह निनायं कालया तत्र राज्ञा क्षणमिव क्षपा प्रातश्च मुक्तशयनः सोध स्नानांतरविधेः स्वसैन्यावाप्तये यातुमुत्सुकोभूद्भूपतिः तावच्चंद्रं तमाभ्रपटशोभां निपातितं भियेवास्ताद्रिकुहरप्रलीनं ध्वस्ततेजसं हंतुकाम इव क्रोधादाताम्रतररोचिषि प्रसारिते करान्दिग्मंडलाग्रे विवस्वति अकस्मादाजगामात्र विद्युत्पिंगशिरोरुहः कज्जलश्यामलः कालमेघाभो ब्रह्मराक्षसः अंत्रमालाकृतोत्तंसः केशयज्ञोपवीतभृत् खाद

न्नरशिरोमांसं कपालेन पिबन्नसृक् सोहं हासं विमुच्याग्रे स्वेनाग्निं वमन्क्रुधा दंष्ट्राकरालो राजानं भर्त्सयन्निजगाद तं पापज्वालामुखेना
म विद्धि मां ब्रह्मराक्षसं निवासस्त्वेष मे स्वन्यो देवैरपि न लंघ्यते सोयं त्वया समाक्रम्य परिभुक्तः स्त्रिया सह रात्रिचर्यागतस्यास्य तद्भुंक्ष्वाविनया
त्फलं एषोहं हन्मि दुराचार कामोपहतचेतसः इत्युक्तोनतः सविनयं भयात्स तमब्रवीन्नृपः अज्ञानतापराद्धं मे मयानेन तत्क्षमस्व मे तवाहमाश्रमे
ह्यस्मिन्नतिथिश्शरणाश्रितः दास्यामि चेप्सितं तुभ्यमानीय तु नरपशुं येन ते भविता प्रीतिस्तत्प्रसीद क्रुधं त्यज इति राज्ञो वचः श्रुत्वा शान्तः स
ब्रह्मराक्षसः अस्तु को दोष इत्यन्तर्विचिन्त्यैवमभाषत यः सप्तवर्षदेशीयो महासत्त्वो विवेकवान् स्वदर्पस्वकृपात्मानं दद्याद्ब्राह्मणपुत्र
कः हन्यमाने च यस्मिन्माता हस्तयोः पादयोः पिता अनुष्टभ्नाति सुदृढं तं निवेश्य महीतले तादृशं पुरुषं मह्यमुपहारीकरोषि चेत् स्वप
खड्गप्रहारेण हतात्सप्तदिनान्तरे तत्क्षमिष्येपकारमन्यथा तु महीपते सद्यो विनाशयिष्यामि त्वामहं सपरिच्छदं श्रुत्वेतत्स भया
द्राजा प्रतिपेदे तथेति तत् तिरोबभूव च ब्रह्मराक्षसः सोपि तत्क्षणं अथ चंद्रावलोकोसौ राजा सेंदीवरप्रभः हयारूढस्ततः प्रायात्सैन्यं चिन्व
न्सुदुर्मनाः अहोऽहं मृगयापानमदेनेन च मोहितः गतः पाडुरिवाकांडे विनाशं वने वालिशः प्राप्यते ह्युपहारोस्य रक्षसः तादृशः कु
तः तन्निजं नगरं तावद्यामि पश्यामि भावि किं इति ध्यायन्स च प्राप सैन्यं चिन्वत्तदागतं तद्युक्तश्च सदारः स्वं चित्रकूटमगात्पुरं तत्र त
स्योचितभार्याप्राप्तिं दृष्ट्वा कृतोत्सवं राष्ट्रं तद्गतदुःखस्य दिनशेषो जगाम सः द्वितीयेह्नि रहः सर्वं स्ववृत्तान्तं शशंस सः मंत्रिभ्यस्तेषु चैकस्तम
न्त्री सुमतिरब्रवीत् विषादं देव ते माभूदुपहारं हि तादृशं आनेष्याम्यहमन्विष्य बह्वाश्चर्या हि मेदिनी एवमाश्वास्य राजानं स सौवर्णीमकार
यत् मंत्री सप्ताब्ददेशीयबालकप्रतिमां द्रुतं रत्नैरलंकृतां तां च कृत्वा शकटेर्पितां भ्रामयामास नगरग्रामघोषेषु तत्ततः यः सप्तवर्ष
देशीयः स्वेच्छया विप्रपुत्रकः ददाति सत्त्वसत्रार्थमात्मानं ब्रह्मराक्षसे उपहाराय तत्तस्यो मातापित्रोरनुज्ञया हन्यमानस्य हस्ताभ्यां हस्त
पादे प्रगृह्णते तस्मै ग्रामशतोपेतां हेमरत्नमयीमिमां ददाति प्रतिमां राजा पित्रोश्चोपचिकीर्षते इति च भ्राम्यमानायास्तस्याः प्रतिकृते शिशोः

पटहोद्घोषणं मंत्री सोऽग्रेजस्रमदात् तावच्छ्रुत्वा तदैकस्मिन्गृहाद्द्विजार्भकः सोऽपि सप्ताब्ददेशीयोऽप्यतिधीरोदात्ताकृतिः पूर्वाभ्यासेन बाल्येऽपि सदा परहिते रतः प्रजापुण्यपाक इव साकारतां गतः उवाचोद्घोषकारेभ्यो युष्मदर्थं ददाम्यहं आत्मानं पितरौ गत्वा बोधयित्वाभ्युपैमि वः इत्यूचिवांस्तान्मुदितान्स बालो मुदितश्च तैः गत्वा गृहं जगामस्वपितरौ रचिताञ्जलिः ददामि सर्वसत्त्वार्थे देहमेतद्विनश्वरं तन्मामभ्यनुजानीतं हतां चापदमात्मनः आत्मप्रतिकृतिं ह्येनां गृहीत्वा वितरामि वां हेमरत्नवतीं राज्ञा दत्तां ग्रामशतान्वितां एवं मे युष्मदानृण्यं परार्थश्चैव सिद्ध्यति युवां वधुत्तदारिद्र्यावत्पुत्रानवाप्स्यथ इत्युक्तवन्तं सहसा पितरौ तौ तमूचतुः किमेतद्भाषसे पुत्र वातेन क्षुभितोऽसि किं किं वा ग्रहगृहीतोऽसि प्रलपस्यन्यथा कथं को ह्यर्थे घातयेत्सूनुं देहं दद्याच्च कः शिशुः एतत्पित्रोर्वचः श्रुत्वा बालः पुनरभाषत न बुद्धिमोहाज्जल्पामि शृणुतं मम यद्वचः अस्राचाशुचिसंपूर्णं मूत्रैश्च जुगुप्सितं दुःखक्षेत्रं विनाश्येव शरीरमचिरादिदं तदेतेनास्य सारेण सुकृतं यदुपार्ज्यते तदेव सारं संसारे कृतबुद्धिभिरुच्यते सर्वभूतोपकाराच्च किमन्यत्सुकृतं परं तत्रापि पित्रोर्भक्तिश्चेत्किं देहाद्दृश्यते फलं इत्यादिवाक्यैः स शिशुः शोचैतौ दृढनिश्चयः तावङ्गीकारयामास पितरौ स्वमनीषितं गत्वा च राजभृत्येभ्यः प्रतिमां तां हिरण्मयीं आनीय प्रददौ ताभ्यां सग्रामशतशासनां ततः कृत्वाग्रतो राजभृत्यांस्तानेव सत्वरं पितृभ्यामन्वितः प्रायाच्चित्रकूटं नृपान्तिकं तत्र चन्द्रावलोकस्तं वीक्ष्याखण्डिततेजसं रक्षारत्नमिव प्रबालं राजाननंद सः आरोप्य गजपृष्ठे च रचितस्रग्विलेपनं निनाय तं सपितृकं केतनं ब्रह्मरक्षसः तत्र मण्डलमालिख्य तस्याश्वत्थस्य पार्श्वतः विहितोचितपूजेन कृते वह्नौ पुरोधसा आविर्बभूव मुक्ताट्टहासः सोऽध्ययनं पठन् घूर्णद्रक्तासवक्षीबो जृम्भमाणो मुहुः श्वसन् ज्वलन्नेत्रो दिशः कुर्वन्देहच्छायान्धकारिताः ज्वालामुखो महारौद्रो ददृशे ब्रह्मराक्षसः ततश्चन्द्रावलोकस्तं दृष्ट्वा प्रह्वोऽब्रवीन्नृपः नरोपहारो भगवन्नानीतः समयात्तव दिवसः सप्तमश्चाद्य प्रतिज्ञातस्य सोऽस्य मे तत्प्रसीद गृहाणैनमुपहारं यथाविधि इति राज्ञार्थितो विप्रं कुमारं ब्रह्मराक्षसः । स तमालोकयामास जिह्वया सृक्किणी लिहन् तत्क्षणं स महासत्त्वो बालो हृष्टश्च चिंतयत् स्वदेहदानेनानेन सुकृतं यन्मयार्जितं तेन माभून्ममस्व

वृक
शशां.

गोमाक्षोवानिरुपक्रियः भूयान्तुमेपरार्थायदेहोजन्मनिजन्मनि इतिसंकल्पयत्येवतस्मिन्नाप्यर्पितत्क्षणात् विमानैःसुरसंघानांपुष्पवृष्टि
मुचोनभः अथाग्रेआपितेनसवालंतेब्रह्मराक्षसः मातानजग्राहकरयोःपिताचरणयोस्तथा सखड्गराक्षसाःत्यक्त्वास्तत्कर्मतविस्मयाः
रचितांजलयःप्रह्वास्तन्तुस्तेऽपिभूमिपाभवन् इतिव्याख्यायवेतालोविचित्रसरसांकथां तंत्रिविक्रमसेनंसनिजगादनृपंपुनः तद्ब्रूहिराजन्कोहे
तुर्यत्तेनहसितंतथा बालेनतादृशेतस्मिन्प्राणान्तसमयेप्यहो कौतुकंचमहन्मेत्रतदेतच्चेन्नवक्षसि जानन्नपिततोमूर्धाशतधातेस्फुटि
ष्यति एतद्वेतालतःश्रुत्वासराजाप्रस्तुवाचतं शृणुयोऽभूदभिप्रायोहासेतस्यशिशोस्तदा योनामदुर्बलोजंतुःसभयेप्रत्युपस्थिते क्रंद
तिशरणहेतोःस्वामातरंपितरंतथा तदभावेनराजानमार्तत्राणायनिर्मितं तदलाभेपिपश्यत्येयथासंभविदैवतं तस्यनैकमपीपत
त्सर्वंसजातमन्यथा पितृभ्यांहस्तपादेहितद्धेतस्यार्थलुब्धया राजाचत्रातुमात्मानंस्वयंतंहंतुमुद्यतः तद्दैवतंतुयद्ब्रह्मरक्षस्तस्यच
भक्षकं अध्रुवस्यास्यतविरसस्याधिव्याधियुतस्यच देहस्यार्थेविमूढानांतेषामीदृग्विडंबना ब्रह्मेंद्रविष्णुरुद्राद्याध्रुवायत्रावश्यविनाशिनः त
त्रैषामीदृशांकापिशरीरस्थैर्यवासना पुनर्न्मोहवैचित्र्यंदृष्ट्वामत्वाचवांछितं सिद्धमाश्चर्यहर्षाभ्यांसजहासद्विजार्भकः इत्युक्त्वावि
रतस्यतस्यनृपतेरस्मात्स्कंधाद्योपितद्वेतालोऽगान्निस्वकंपदमगादंतर्हितोमायया राजाप्यविकल्पमेवपुनरप्यन्वगाद्यो तंजवाद
क्षोभ्यहृदयंवर्तेतमहतांसंभोधिनीनामिव ॥ इतिश्रीमद्भट्टसोमदेवविरचितेकथासरित्सागरेशशांकवतीलंबकेसप्तविंशस्तरंगः ॥
इतिविंशोवेतालः ॥ अथगत्वापुनःप्राप्यशिंशपातोग्रहीन्नृपः त्रिविक्रमसेनोसवेतालंतंनराधिपः आगच्छंतंचतंभूयःसवेतालोऽब्रवी
न्नृप राजन्नुत्पादकंदर्पोऽस्त्येतत्कार्यवच्मितेकथां अस्तिशक्रपुरीवान्याधात्रासुकृतिनांकृते दिवस्थानांविहिताविशालाख्यापुरीभुवि
तस्यांबभूवन्नृपतिःपद्मनाभइतिश्रुतः सतांसूनुर्नंदनःश्रीमानाक्रांतबलिराजकः तस्मिन्नृपतिनीतस्यानगर्यांतुमहावणिक् अर्थदत्ता
भिधानोऽभूद्धनैर्विजितवित्तपः तस्यकाचसुतानंगमंजरीत्युदपद्यत सःसुंदरीप्रतिकृतिर्भुविचात्रेवदर्शिता दत्ताचतेनवणिजावणिग्व

७२७ राम
७६

रसुताप्रसा मणिवर्माभिधानाय ताम्रलिप्तीनिवासिने एकापत्यतया चातिवत्सलः सन्नतां वणिक् भर्तृयुक्तां सुतां गेहान्नत्याजानंगमंजरी
तस्याश्चानंगमंजर्याः पतिः द्वेष्यो बभूव सः मणिवर्मा स तस्यास्तु कटुतिक्तमिवौषधं पत्युः स्वसास्य सुमुखी जीवितादप्यभूत्प्रिया धनर्द्धिः
कृपणस्येव बहूछ्रान्सुचिरं संचिता एकदा चातिकपित्रोः ताम्रलिप्तीं निजं गृहं उत्कंठादिनिमित्तेन मणिवर्माजगाम सः ततो दिने प्रयाते
श्रुतीस्ताः सूर्यांशुसायकैः शोषितानां निरुद्धांधा घर्मकाल इवाभ्यगात् वेश्मनविरहातुरस्तानिःश्वासाः ककुभामिव मल्लिकापाटलामो-
दमधुरा मरुतो ववुः उत्पेतुः पवनोद्धूता गगने रेणुराजयः हृतो घनागमायेव प्रहितास्तन्नयाभुवा आकांक्षिततरुच्छायाः कठोरातपतापिताः
पथिका इव यांति स्म चिरेण दिवसा अपि चंद्रास्तु पांडुरुचयो मारुतास्सुखप्रदं विनाहेमंतमगमन्नतितुच्छतां निशाः तत्काले चंदनाले-
पधवला सा वणिक्सुता सखीनतनुकाशीयथामितानंगमंजरी ददर्श स्वगृहे हेतुंगवातायनगतैकदा आसन्नरथ्याद्युताभंश्व युवानं विप्रउत्र-
कं संचरंतं रतिनिशाशोनेवोन्मज्जमिव स्मरं कमलाकरनामानं उत्तरांगउत्रोपमः सोपीहारिवमूर्तिं तां कांतां दृष्ट्वोपरिस्थितां कुमुदाकर-
तांभेजे सानंदः कमलाकरः सहस्थितेन नीतोभूत्कथंचिद्भवनं निजं सापि तत्रामनोन्विव्याधिविद्धानंगमंजरी तयास्तयासमंसख्याश्रा-
विशाह्वासमंकेप्रान्तेः तत्र संचिंतयंती च कांते कामज्वरातुरा तापप्रपन्नाम्प्रणोत्किंचिह्नुठंती शापनेयके गते प्रहः सुहृद्वेष्टुसत्रपासमया च सा
अत्यंतविरहोन्मादं विसोढुं कृशपांडुरा दुःप्राप्यप्रियसंयोगनिराश्यानक्रमेकदा गवाक्षप्रहितकरेनाकृष्टेव हिमांशुना सुप्ते परिजने सै-
दं निर्गत्य मरणोत्सुकी जगाम त्वरिता गृहोद्यानवापीतटतलाश्रिता तत्र पित्राकृतोद्धारप्रतिष्ठां कुलदेवतां उपेत्य चंडिकादेवीं नत्वा स्तुत्वा व्यजि-
ज्ञपत् अस्मिन्जन्मनि चेद्भर्ता न मया कमलाकरः प्राप्तस्तद्देवि भूयान्मे सोन्यस्मिन्नपि जन्मनि इत्युक्त्वाग्रतस्तस्या देव्याः साशोकपादपे पा-
शं विरचयामास स्वोत्तरीयेण रागिणी तावदाप्ता सखी तस्याः साप्रबुध्यात्रवासके तामदृष्ट्वा तदुद्याने दैवादागाद्विचिन्वती तत्र दृष्ट्वा च
तां पाशमर्पयंतीं तथा गले मामेत्युक्त्वा प्रधाव्यैव पाशं तस्यास्तमच्छिनत् सापि तां वीक्ष्य संप्राप्तां हृतपाशा निजां सखीं अनंगमंजरी भूमौ

पपानाधिकदुःखिता आश्वासिता स्वसख्यो च तया पृष्टा च सा क्षणात् दुःखहेतुमुपाख्याय पुनरेतामभाषत सखि मालतिके तन्मे दुर्लभे प्रियसंगमे गुर्वादिपरतंत्राया न सुखं मरणं त्वयं इति ब्रुवाणैवानंगशराग्निज्वलिता भृशं सानंगमंजरी मोहं ययौ नैराश्यनिस्पृहा कष्टं स्मराज्ञा दुर्लंघ्या यया नीता दशामिमां अन्याविनीतवनिताहासिनीयं सखी मम इत्यादि विलपंतीं च तां सा मालतिका सखी शनैराश्वासयामास शीतांबुपवनादिभिः तापोपशांतये चास्याः चकार नलिनीदलैः शय्यां ददौ च हृदये हारं तुहिनशीतलं ततः सा तु मुदा चेतां सखीं सानंगमंजरी सखि हारादिभिर्नायं दाहो न मेर्मप्रशाम्यति येन प्रशाम्यति पुनः स्वबुद्ध्यैव विधत्स्व तत् मां संयोजय कांतेन जीवितं मे यदीच्छसि एवमुक्तवतीं तां सा स्नेहान्मालतिकाब्रवीत् सखि भूयिष्ठा याताद्य रात्रिः प्रातरहं पुनः इहैव कृतसंकेतमानेष्यामि प्रियं तव तदालंब्य धृतिं तावन्निजं प्रविश मंदिरं इत्युक्तवत्यै संतुष्य तस्यै सानंगमंजरी सखि हारादिभिर्नायं दाहो न मेर्मशाम्यति येन प्रशाम्यति पुनः स्वबुद्ध्यैव विधत्स्व तत् मां संयोजय कांतेन जीवितं मे यदीच्छसि एवमुक्तवतीं तां सा स्नेहान्मालतिकाब्रवीत् २ हारं स्वकंठादाकृष्य प्रददौ पारितोषिकं गच्छाधुनैव स्वगेहं प्रातः सिद्धौ ततो व्रज इति चैतां सखीं प्रेष्य सा विवेश स्वधामकं प्रातश्च सा मालतिका केनाप्यनुपलक्षिता तत्सखीं तस्य कमलाकरस्य भवनं ययौ चिन्वती तत्र सोद्यानतरुमूले ददर्श तं चंदनार्द्रं तुहहिलीपत्रशय्याविवर्तिनं रहस्यधारिणैकेन कदलीदलमारुतैः आश्वास्यमानं सुहृदा दह्यमानं स्मराग्निना तया विनेयमस्य स्यात्कामावस्थेदृशीति सा विचिंत्य तस्याप्रवृत्त्याज्ञातुं तत्रैव निभृतं तावच्च सुहृदा तेन स ऊचे कमलाकरः क्षणमेकमिहोद्याने दत्तदृष्टिं मनोरमे विनोदय मनो मित्र मात्र विक्लवतां गमः तच्छ्रुत्वा तं स सुहृदं विप्रपुत्रो जगाद सः यन्ममानंगमंजर्या वलिकुसुमानयाहृतं विनोदयामि तदिदं ऊतः शून्याशायामनः स्मरेणास्त्रन्यहृदयो बाणतूणीकृतो ह्यहं तस्मात्सोमि मनस्वैरीं तां यथाऽहमेनया इत्युक्तो विप्रपुत्रेण तेनात्मानं प्रदर्श्य सा हृष्टा मालतिकाभेत्य तमुवाचात्तसंज्ञया तवास्यानंगमंजर्या सुभग प्रहितांतिकं संदेशं चाहमेवैषा निःस्पृहस्यापि ब्रवीमि ते करवाशि

ष्टपथमोघं प्रविश्य हृदयं हठात् मनो मुषितानुरयायागाम्येतेस्पाशितात्मना चित्तं च यद्धामहृष्टानुम्भमेव तयाधुना मनोहरायदेहोपि
दानुप्राणैः सह हन्येते निःश्वासोच्छ्वासिसंततान्विमुंचति दिवानिशं ज्वलितेहृदि कंदर्पवह्निधूमोद्गमानिव सापतेनिमुक्तश्वासा साज
नावाष्पबिंदवः वदनांभोजसौगंध्यलुब्धामधुकरा इव नद्यो दीर्घुसितेन हृष्टिभिः शिरं वा मुभयोरहं इत्युक्तो मालतिकया सोब्रवीत्कमलाक
रः भद्रे भयंकरोन्तेषा वात्या वा श्वास संभ्रमपि वदंती विधुरा व स्यावहृ भोवाचमे प्रियां न देकागतिरत्र त्वं यथा वेत्सि तथा कुरु इत्युक्तेवा
वे कमलाकरे मालतिकाब्रवीत् अनंगमंजरीमद्युञ्जानाडापयाम्यहं नक्तं त्वमंबरोद्याने तिष्ठेत्यद्यवाद्यतः ततः प्रवेशयिष्यामि
तामभ्रांतास्वयुक्तितः एवं यथे सृष्टुवपोर्भविष्यतिसमागमः इत्युक्तोनंदितेविप्रपुत्रे मालतिका ततः गत्वा कृतार्थासानंगमंजरी
मप्यनंदयत् अथ याक्तासह पातेकेक्वापि सध्यानुरागिणी ऐंद्रा दिशं तु तिलके नानने सुप्रसाधिते त्यक्तपद्माकरा प्राप्ताश्रीमयेनी
वहर्षतः हसत्सु कुमुत्वदने विपदेऽमुदाकरे कृतप्रसादनः सोत्कः स्वैरं सकमलाकरः कामोकालागकोद्यानद्वारं वाह्यमुपागमत् तावच्च
सामालतिकातापुक्तानंगमंजरी आनिनाय तदुद्याने कृक्कार्हमितवासरा उपवेश्य च नामधेयगुल्मके चूतशाखिना प्रावेशयत्तं निर्गत्य त
त्रैव कमलाकरं स च प्रविश्य पत्रौघघनपादपमध्यगां तामध्यगाद्वृक्षछायां ददर्शानंगमंजरी उपेतिया वत्स सतोतावद्दृष्ट्वा प्रधाव्यासा का
मोवगाहतश्रीडांकं ठेतसहसाग्रहीत् कृपानिलखोसिमयेत्यालपंती च नत्वस्लात् सानिर्हर्षभरक्तध्वनिः श्वासापं च तामसात् पपात
च महीपृष्ठे वातनुगणालतेवसा विचित्रो वत कामस्य विपाकविषमः क्रमः तद्दृष्ट्वा सन्निपातोग्रसद्यः सकमलाकरः हाहाकिमेतदित्यु
क्त्वा मूर्छितोप्यपतद्भुवि लब्धसंज्ञः क्षणेनाथ तामेकारोपिताप्रियां आलिंगन्याक्षिसुंबं स्वनतन्नाविलपच्च कृ तथा दुःखातिभारेण तप्तस
ह्यामिपीडितः पपात स्पंदस तत्क्षणाद्धृदयमस्फुटत् अथ तौ मालतिका प्रातश्चमानावुभावपि दृष्ट्वा प्राप्तक्षयौ शोकादिव स्वीणाभ
वत्सपा प्रातरुद्यानपालेभ्यो ज्ञात्वा बंधुजनस्तयोः तत्राययौ तपास्त्रपंडुःखमोहाकुलीकृतः आसीत्कालेथ मन्तस्मिन् चिरं खेदादवाप्सु खः

व.क.
श.शं.

कष्टाः कुलवलीकारे हेतवो वत कुस्त्रियः तावच्चतामलिन्दीनः सतस्यापतिरागमत् सोत्कंठोनंगमंजर्यामणिवर्मापितुर्गृहात् सहसा सुरत
हृष्टाप्युपयातस्तमवेद्यतत् वाप्पांधलोचनोभ्यायंस्तदेवोद्यानमाययौ तत्रभार्यांगतासुंतांदृष्ट्वान्यसहितामपि शोकाग्निज्वलितांगकः
सद्यःसोपिजहावसून् ततःक्रंदतितत्रस्थेजनेकोलाहलाहलाकुले आययुःश्रुतवृत्तांतपौराःसर्वेचविस्मिताः अथानंगमंजर्याः
पित्राश्वावतारिता देवीसन्निहिताचंडीविज्ञप्ताभून्निजैर्गणैः तदारामप्रतिष्ठाकृदर्थंदत्तःसदैषत भक्तोवणिक्कदस्यास्मिंदुःखेदेवि
दयांकुरु एतच्छ्रुत्वाभ्यःस्त्वासाशरण्याशंकरप्रिया शांतानंगास्त्रयोप्येतेजीवंतितिसमादिशत् एवंसर्वेपितेसुप्तप्रतिबुद्धाइवक्षणात्
तत्प्रसादात्समुत्तस्थुःजीवंतोवीतमन्मथाः ततोदृष्टान्तदाश्चर्येसानंदेसकलेजने लज्जानतमुखःप्रायात्स्वगृहंकमलाकरः अथ
दत्तोपिताङ्गीतामाद्यायानंगमंजरी सुतांस्वभर्तृसहितांययौवृद्धोत्सवोगृहं इतिकथयित्वातस्मैराज्ञेमार्गेकथांसवेतालः निजगा
दतंत्रिविक्रमसेनंक्षोणीपतिंभूयः राजन्ब्रूहिसर्वदैतेष्वधिकोमोहातुरागमवलेस्मिन् सोत्रचपूर्वोक्तस्तेशापोजानन्नचेद्वदसि इत्ये
तावद्वेतालाच्छ्रुत्वासप्रत्युवाचतंनृपतिः एतेषुरागमूढःप्रतिभातिममाधिकःसमणिवर्मा इतरौहितावुभावपिकालक्रमपक्वमन्म
थावस्थौ अन्योन्यसानुरागौयदिजीवितमुज्झतःस्मतद्भवतु मणिवर्मात्वतिमूढोयोभार्यामन्यपुरुषासक्तमृतां दृष्ट्वैवकोपकालेप्र
सुतरक्तःशुचामुचत्प्राणान् इतिगादितवतःसतस्यराज्ञोवेतालपतिःपुनर्जगाम निजमेवनिकेतनंसपृष्टादस्यराजापितमन्व
गात्सभूयः॥ इतिश्रीमद्दसोमदेवविरचितेकथासरित्सागरेशशांकवतीलंबकेअष्टाविंशस्तरंगः॥ इत्येकविंशोवेतालः॥ ततोराजापु
नर्गत्वावेतालंशिंशपाग्रतः सत्रिविक्रमसेनस्तत्रप्राप्यांसारोपितंव्यधात् आयांतंतंचराजानंसवेतालोब्रवीत्पथि राजन्साधुत्वमसतस्त्वंत
दपूर्वांकथांशृणु बभूवपूर्वंकुसुमपुराख्येनगरेश्वरः पद्मीनलेस्मिन्धरणीवराहोनामभूपतिः तस्यब्राह्मणभूयिष्ठेराष्ट्रेब्रह्मस्थला
भिधः अग्रहारोभवत्तत्रविष्णुस्वामीत्यभूद्द्विजः तस्यानुरूपाभार्याभूत्स्वाहानामहविर्भुजः तस्यांचैतस्यचत्वारःक्रमादुत्पेदिरेसुताः अ

७७१

राम
१८

पीतवेदेहलग्नां तशैशवे पुत्रते पुत्रः विमुक्तामीदिवंप्रायाद्भार्ययानुगतस्तया ततस्ते तत्र तनुजाः (सर्वे पानाप्य दुःखिताः गोत्रजैर्हृतसर्वस्वा
मंत्रयांचक्रिरे मिथः नास्तीह गतिरस्माकं तद्व्रजामो वयं न किं ततो मातामहगृहं ग्रामं यज्ञस्थलाभिधं एतदेव विनिश्चित्य प्रस्थिता भैक्ष्यभो
जनैः मातामहगृहं प्राप्तास्तेपानहद्रुमिदितैः ततो मातामहाभावान्मातुले दत्तसंस्थयाः क्षेत्रजाताः तद्गृहे तस्थुः स्वाध्यायाभ्यासतत्पराः ९
कालक्रमाच्च तेषां ते मातुला नामकिंचनाः स्ववज्ञापात्रतां जग्मुर्भोजनाच्छादनादिषु ततः स्वजनजस्फूर्जदवमानाहतात्मना तेषां रहः
सचिंतानां ज्येष्ठो भ्रातात्रवीदिदं भो भ्रातरः किं क्रियते सर्वमात्वहते विधिः नष्टः का पुरुषस्येह क्वचित्किंचित्कराचन अहं हठद्देशगतो भ्राम्यन्स्त्रो
त्रोवापितटकानने विपन्नस्थितमद्राक्षं स्नानागपुरुषंभुवि अचिंतयं च हृद्धात्र अहतास्यहृदयं नाति धन्योयमेवं विश्रांतो दुःखभारं विमुच्य यः
इति संचिंत्य तत्कालं कृतामरणनिश्चयः वृक्षाग्रशंकितापाशेनात्मानमवलंबयं तावत्तमेवविसंतस्य तदा निर्यांतिनामवः तावत्त्रुटितपाशो
त्रपतितोस्मि महीतले लब्धसंज्ञश्च केनापि पुमान्क्षिप्रात्कृपालुना आश्वास्यमानमात्मानमपश्यं पटमाहितैः सत्वेकथय विहातत्येवं क
प्रतिविह्वलं सुखेहि स्पृहता दुःखं दुष्कृतादेति नान्यतः दुःखापहितवोद्योगः सुकृतं तत्समाचर कथं तु नारकं दुःखमात्मत्यागेन वांछसि
इत्युक्त्वा मां समाश्वास्य स चक्रपाणिगतः पुमान् अहं चेहागतस्त्वत्का नाहं श्रमरत्नोद्यमे तदेवं ते ध्रुतिविधो मृत्युमपि न लभ्यते इदानीं च तत्तु तीर्थे
तपसा दाहयाम्यहं येन निर्धनता दुःखभागी तस्मान्महत्त्वतः इत्युक्तवंतं ज्येष्ठं तं कनिष्ठभ्रातरोब्रुवन् अर्थं विना कथं प्राज्ञो पापं दुःखेन वा पस
किं न वेत्सि यदर्थानां प्रारंदं च चलागतिः आहृत्य रक्ष्यमाणोपि यत्नेनातविरागिणी अस्मत्पैत्री च वेश्या च श्रीश्च कस्य कदा स्थिरा तदुद्योगेन
सगुणः कोप्युपाज्योमनस्विना आनीयते हठाद्बुद्ध्या येनार्थः हरिणीसृजः इत्युक्तो भ्रातृभिर्धैर्यक्षमाज्येष्ठो वलव्यसः उवाच कोपगुणस्तावदृगजे
नीयो भवेदिति ततो विचिंत्य सर्वेते वदन्निस्मपरस्परं विचिंत्य धौविक्तानेकिंचिच्छिक्षामहे वहायं निश्चित्य तेनत्वं संकेतस्थान मुहूर्तास समागमे
एकैकशस्ते चत्वारस्तु ततः प्रययुर्दिशः यातिकाले च मिलितास्ते संकेतनिकेतने किं केन शिक्षितमिति भ्रातरोन्योन्यमब्रुवन् अप्यात्रैको भवेदीह

७६
शशां.

विज्ञानं शिक्षितं मया येनास्थिशकलं प्राप्य प्राणिनो यस्य कस्यचित् उत्पादयाम्यहं तस्मिन्मांसं तदुचितं क्रमात् एतत्तस्य वचः श्रुत्वा द्वितीय
स्तेष्वभाषत अहं तस्यैव संजातमांसेस्थिशकले किल जानेजनयितुं लोमत्वचं तस्य प्राणिसंभवं ततस्तृतीयोप्यवदज्ज्ञाने तस्यैव चास्म्यहं तस्या
ल्पवयवान्द्रष्टुं जातत्वङ्मांसलोमनि चतुर्थश्च ततो वादीदुत्पन्नावयवाकृतिं तमेव प्राणिनं प्राणैर्युक्तं कर्तुमवैम्यहं एवमुक्त्वा मिथः स्वस्व
विज्ञानप्रथनाय ते चत्वारोप्यस्थिखण्डाय ययुः प्रान्तरोटवीं तत्र सिंहस्य ते प्रापुरस्थिखण्डं विधेर्वशात् अविज्ञातविशेषाश्च गृहीत्वा तत्तथैव
तत् एकस्तु तस्समुचितेनास्य मांसेनयोजयत् द्वितीयोजनयत्तस्य तद्वत्त्वग्लोमसंहतीः तृतीयश्चाखिलैरंगैस्तद्योग्यैस्तमपूरयत् चतुर्थश्च
ददौ तस्य सिंहीभूतस्य जीवितं उदतिष्ठदथोद्धूतसटाभारोतिभैरवः सदंष्ट्रः संकटमुखः सिंहः खरनखांकुशः बाधित्वा चतुरस्तान्निर्मातॄंस्ताने
व चतुरोपि सः अवधीत्केसरी दृप्तो विवेश च वनं ततः एवं ते सिंहनिर्माणदोषान्नष्टा द्विजातयः दुष्टं जंतुं समुत्थाप्य कस्यात्मनि सुखं भवेत् इ
त्थं चोपार्जितेयत्नाद्गुणोपि विधुरे विधौ संपन्नये न न परं जायते तु विपन्नये मूले ह्यव्याहते दैवसिक्तः प्रज्ञानवारिणा नयालवालः फलति प्रायः
पौरुषपादपः इति तस्यां निशि मार्गे वेतालेनांसतः कथां तत्र आख्याय सत्रिविक्रमसेनो राजा पुनर्जगादे राजंस्तेषु पापीयान् चतुर्षु कस्तत्र सिं
हनिर्माणे योन्यवधीत्तत्तोसौ वद समयः सोत्र पूर्वोक्तः इति वेतालतः श्रुत्वा तस्माद्राजा सोचिंतयत् यद्धि मौनं स्वं इच्छति गंतुमयं मे यातानेष्या
म्यहं भूयः इति हृदि निश्चित्य स तं महीपतिः प्रत्युवाच वेतालं यस्तस्य जीवदायी सिंहस्य पापभाक् स तु प्राणिविशेषमबुद्ध्वा मांसत्वग्लोमनि
र्माणं युक्तिबलात्तु कृतं यैः तेषां दोषोस्ति नाज्ञानात् येन तु सिंहाकारं दृष्ट्वा विद्याप्रकाशनोत्केन प्राणास्तस्य वितीर्णास्तेन कृता ब्रह्महत्यास्ताः
एतन्नरेन्द्राद्वचनं निशम्य स्वधाम वेतालवरो जगाम तस्यांसतस्तत्पुनरेव मायी राजापि तं सोनुससार भूयः॥ इति श्रीभट्टसोमदेवविरचिते क
थासरित्सागरे शशांकवतीलंबके एकोनत्रिंशस्तरंगः॥ इति द्वाविंशो वेतालः॥ ततो गत्वा पुनः प्राप्य शिंशपापादपात्ततः सत्रिविक्रमसेनस्तं वेता
लं राजसत्तमः स्कंधे कृत्वा चचाल तं मौनी दर्शितानेकवैकृतं यावत्प्रतिष्ठते तावत्स वेतालस्तमब्रवीत् राजन्नकार्येप्येतस्मिंस्तु कोयं दुराग्रहस्तव न ते श्रम

७२

राम
२५

प्रतिपन्नं तथा ताभ्यां सत्येकन्याभिवर्तने एवं पादविपर्यासात्पितापुत्रयोस्तयोः दुहितामातरौ भार्ये जाते श्वश्रूस्नुषे तदा कालेन च तयोस्ताभ्यां भर्तृभ्यां जज्ञिरे द्वयोः पुत्रा दुहितरश्चैव तेषां चान्यप्यपक्रमात् इत्थं संश्राव्य तां चंडसिंहसिंहपराक्रमौ उत्तस्थतुस्तत्र लावण्यवती चंद्रवती च ते इत्यावर्ण्य वेतालस्तस्मै पथि कथां निशि सत्रिविक्रमसेनं तं पप्रच्छ नृपतिं पुनः तयोर्मातादुहित्रोर्ये पुत्रपित्रोस्तयोर्नृप सकाशाज्जातवो जाताः क्रमादुभयपक्षयोः ज्ञातेयं ब्रूहि मे तेषामन्योन्यं किं भवंति ते पूर्वोक्तः सोत्र शापस्ते जानानस्यैव वक्ष्यसि एतद्वेतालतः श्रुत्वा विमृषन्नपि सः नाज्ञासीत्तद्यदा राजा तूष्णीकः प्रययौ तदा ततस्तं स शवांतस्थो वेतालो विहसन्हृदि मृतपूरुषदेहान्तर्निविष्टः समचिंतयत् नायं राजा महाप्रश्ने वेत्त्यस्मिन्नुत्तरं तेन तूष्णीं व्रजत्येवं हृष्टोतिचतुरैः पदैः न चैवं वंचयितुं शक्यः सत्वराशिरयं परः क्रीडन्भिक्षुः स चास्माभिरियन्नैव न शाम्यति तदद्य वंचयित्वैतं दुरात्मानमुपायतः तत्सिद्धिं भाविकल्याणो राजन्यास्मिन्निवेशये इत्यालोच्य स वेतालो नृपं तमवदत्तदा राजन्क्लिसन्निशाघोरे श्मशानेस्मिन्गतागतैः एतैः क्लिष्टः सुखोचितं ननविकल्पश्च कोपि ते तदाश्चर्येण धैर्येण तुष्टोहममुना तव शवमेनं नयेदानीं निर्गच्छाम्यमुतो ह्यहं इदं च शृणु यद्वच्मि हितं तव कुरुष्व च आनीतमेतद्भवता यस्यार्थेन कलेवरं कुभिक्षुः सोद्य मामस्मिन्समाकृष्यार्चयिष्यति उपहारीचिकीर्षुश्च त्वामेव स पशुं ततः भूमौ प्रणामं समष्टाभिरंगैः कुर्विति वक्ष्यति त्वं प्राग्दर्शय तावन्मे करिष्येहं तथैव तत् इति सोपि महाराज वक्तव्यः श्रमणस्त्वया ततो निपत्य भूमौ स प्रणामं यावदेव ते दर्शयिष्यति तावत्त्वं छिन्द्यास्तस्यासिना शिरः ततो विद्याधरैश्वर्यसिद्धिर्या तस्य वांछिता तां त्वं प्राप्स्यसि भुंक्ष्वेमां भुवं तदुपहारतः अन्यथा तु स भिक्षुस्त्वामुपहारं विधास्यति एतदर्थं कृतो विघ्नः तवात्र यावच्चिरं मया तत्सिद्धिरस्तु ते गच्छेत्युक्त्वा तस्यांसस्थशवगात् निर्गत्य सद्योतस्माद्वेतालः प्रेतकायतः अथ स नरपतिस्तत्प्रीतवेतालवाक्याच्छ्रमणमहितमेवं शांतिशीलं विचिंत्य वटविटपितलेतत्तस्य पार्श्वं प्रतस्थे मृतपुरुषशरीरं तद्गृहीत्वा प्रहृष्टः ॥ इति श्रीमहासोमदेवविरचिते कथासरित्सागरे शशांकवतीलंबके एकत्रिंशस्तरंगः ॥ ३ ॥ इति चतुर्विंशो वेतालः ॥ ततस्तं स्वानिकं

वृ.क.
शशां.

भिक्षोः क्षान्तिशीलस्य भूपतिः सत्रिविक्रमसेनोत्र प्राप स्कंधे शवं वहन् ददर्श तं च श्रमणं तस्थमार्गाभिमुखमेककं कृष्णपक्षक्षपारौद्रे श्मशाने तरुमूलगं असृक्क्लृप्तस्थले गौरेणास्थिचूर्णेन निर्मिते मंडले भिक्षुर्विन्यस्तपूर्णशोणितकुंभके महातैलप्रदीपाढ्ये हुतपार्श्वस्थवह्निनि संभृतोचितसंभारे स्वेष्टदेवतपूजने उपागाच्च स तं राजा सोपि भिक्षुर्विलोक्य तं आनीतशवकं हर्षादुत्थायोवाच संस्तुवन् दुष्करो मे महाराज विहितोनुग्रहस्त्वया त्वादृशाः क्क चेष्टेयं देशकालौ क्क चेदृशौ निर्व्याजमत एवाहुर्मुख्यं त्वां कुलभूभृतां एवमात्मानपेक्षेण परार्थो येन साध्यते एतदेव महत्त्वं च महतामुच्यते बुधैः प्रतिपन्नादचलनं प्राणनाशात्ययेपि यत् इति ब्रुवन्स सिद्धार्थमानी भिक्षुः स भूपतेः तस्मादवतारयामास स्कंधात्तच्छवकं तदा स्नापयित्वा समालभ्य बद्धमाल्यं विधाय च मध्ये मंडलस्यांतः स्थापयामास तत्स्थितं भस्मोद्धूलितगात्रश्च केशयज्ञोपवीतभृत् प्रावृतप्रेतवसनो भूत्वा ध्यानस्थितः क्षणं तस्मिन्मंत्रबलाकृष्टप्रविष्टनरकलेवरे तं वेतालवरं भिक्षुः पूजयामास स क्रमात् ददौ तस्मै कपालार्घपात्रेणार्घं सुनिर्मलैः नरदंतैस्ततः पुष्पं सुगंधि च विलेपनं ददौ मानुषनेत्रैश्च धूपं मांसैर्बलिं तथा समाप्य पूजां राजानं तमुवाच स पार्श्वगं राजन्निहास्य मंत्राधिराजस्याहृतसंनिधेः प्रणाममंगैरष्टाभिर्निपत्य कुरु भूतले येनाभिमतसिद्धिं ते दास्यत्येष वरप्रदः श्रुत्वैतत्स्मृतवेतालवचो राजाब्रवीत्स तं नाहं जानामि तत्पूर्वं प्रदर्शयतु मे भवान् ततस्तद्देवतदहं करिष्ये भगवन्निति ततो दर्शयितुं यावत्स भिक्षुः पतितो भुवि तावत्खड्गप्रहारेण स राजास्याच्छिरोच्छिनत् आचकर्ष च हृत्पद्ममुदरादस्य पाटितं वेतालाय च तस्मै तच्छिरोहृत्कमलं ददौ साधुवादेभितो दत्ते हृष्टैर्भूतगणैस्ततः तुष्टोब्रवीत्स वेतालो नृपं तत्रकलेवरात् राजन्विद्याधरेंद्रत्वं भिक्षोरासीद्यदीप्सितं तत्तावद्भूमिसाम्राज्यभोगांते ते भविष्यति क्लेशितोसि मया यत्तत्तदभीष्टं वरं वृणु इत्युक्तवंतं वेतालं स राजा तमभाषत त्वं चेत्प्रसन्नः को नाम न सिद्धोभिमतो वरः तथाप्यमोघवचनमिमं त्वत्तोहमर्थये आद्याः प्रश्नकथा एता नानाख्यानमनोरमाः चतुर्विंशतिरेषा च पंचविंशी समाप्तिगा तवाख्यानाभवंत्येता पूजनीयाश्च भूतले इति तेनार्थितो राज्ञा वेतालो निजगाद सः एव

३७८

राम
८२

मन्तु विशेषेण श्रूयतां वचनं च भूपते याश्चतुर्विंशतिर्वृत्ता याचैषा कासमापिनी यः श्लोकमात्रमप्यस्याः पाठं विधास्यति सादरः यो वा श्रोष्यति तौ स द्याव-
न्क शापाभविष्यतः यक्षवेतालकूष्माण्डडाकिनीराक्षसादयः न तत्र प्रभविष्यन्ति यत्रैषा कीर्तयिष्यते इत्युक्त्वा स ययौ तस्मान्निर्गत्य नृकलेवरात् य-
याभिमतश्चिन्तयामवेतालो योगमायया ततस्तत्र सुरैः सार्धं राज्ञस्तस्य महेश्वरः साक्षादाविर्भूय हृष्टः प्रणतं चादिदेश तं साधु वत्स हतो ह्येष यत्त्व-
या कूटतापसः विद्याधरमहाचक्रवर्तिताहठकामुकः मयादौ विक्रमादित्यः सृष्टोऽभूः स्वांशतो मया म्लेच्छरूपावतीर्णानामसुराणां प्रशान्तये
अद्यापि दृप्तदैत्येन्द्रदमनाय मया पुनः त्वं त्रिविक्रमसेनाख्यो वीरः सृष्टोऽनु भूपतिः अतः सद्वीपपातालां स्थापयित्वा वशे महीं विद्याधराणामचि-
रादधिराजो भविष्यसि भुक्त्वा दिव्यांश्चिरं भोगानुद्विग्नः स्वेच्छयैव तान् मत्तो मय्येव सायुज्यमेतेयास्यस्यसंशयं अपराजितनामानं खड्गं चैनं
गृहाण मे यस्य प्रसादात्सर्वं त्वं प्राप्स्यसे तद्यथोदितं इत्युक्त्वा खड्गरत्नं तद्दत्वा तस्मै महीभृते वाक्पुष्पाभ्यर्चितस्तेन देवः शंभुस्तिरोदधे अ-
थ दृष्ट्वा समाप्तकार्यं मघोषं निशि प्रयातायां प्रविवेश स त्रिविक्रमसेनः स्वपुरं नृपः प्रतिष्ठाने तत्र क्रमागतनराज्ञिविचेष्टिताभिरभ्यर्चितः प्र-
कृतिभिर्विनतोन्नताभिः स्नानप्रदानगिरिशार्चनतूर्यगीतवाद्यादिभिस्तद्दिवसं दिनं निनाय अल्पैरेव च वासरैः स नृपतिः शार्वस्य वीर्यादसौ ।
सद्वीपां सरसातलां च वसुधां निष्कण्टकां मेदिनीं संप्राप्याथ हराज्ञया सुमहतीं विद्याधराधीशतां भुक्त्वा तां च चिरं जगाम भगवत्सायुज्यमन्ते कृ-
ती इति त्रिविक्रमकेसरी समन्त्री चिरमिलितः यधिशापविप्रयोगात् अभिधाय पुनर्मृगाङ्कदत्तं सुकृतार्घं निजगाद राजपुत्रं एवं देव
सत्येष्टा विश्रा वेतालपंचविंशतिका एतामाख्यायिकां ग्रामे तस्मिन्वा च मा भूपः तन्मुखः स त्रिविक्रमसेनो राजा किलैवमक्लीवः वेतालात्
ग्रहणतः किमिव न यत्प्राप्तवानिष्टं तस्मादिदं त्वमपि मन्त्रवरं गृहाण मन्त्रः प्रसादप्रविमुक्तविषादवन्निः वेतालमनुनाप्रभुना मृगाङ्कदत्तेन स-
गम्य भवाद्य सिद्ध्येन न ह्यसाध्यं किंचिदुत्साहभाजां भग्नोत्साहो वत्स को नावसीदेत् तन्नेशीला वृश्चिपतत्कुरेष त्वमेव बन्धुः सपदि शतानि ह-
तौ इत्युक्तवतः तस्माद्द्विजाद्दाय सक्रियं मन्त्रं तेनामन्त्रयत तां हरेर्वाजपिनीगतो भूवं तत्र श्मशाने मठ कं जन्यां माहत्सहतात्स्वपनादितस्य ।

द.क.
शा.शा.

आहूय मंत्रेण च तेन तस्मिन्वेतालमभ्यर्चितवान्यथावत् भोज्यं महामांसमादाय तस्मैन्प्रैमयात्सोपि तदाशु जग्ध्वा तृप्तोस्मि नैवान्यदुपानयेति मा
मभ्यधान्मानुषमांसगृध्नुः कालं यदा नाक्षमतात्र किंचिदुत्कृत्य मांसानि तदा निजानि प्रादामहं प्रीतिकराणि तस्मै योगीश्वरस्तेन समेत्यतुष्यत् अ
थाब्रवीन्मांससखेऽदृढेन सत्वेन तुष्टोस्म्यहमधुना ते तत्पूर्ववत्कहीनभवाक्षतांगो बली च मत्तो वरमीप्सितं च इत्युक्तवंतं तमहं तदैव प्रसत्तुवमोन
यदेव तत्र यत्र प्रभुर्मे स मृगांकदत्तो नातः परोन्योभिमतो वरो मे एतत्स वेतालपतिर्निशम्य मामभ्यधात्तर्हि ममांसपृष्ठे आरोह यावन्नरसा
भवंते तस्यांतिकं त्वस्य विभोर्नयामि इत्येवमस्योक्तवतस्तथेति स्कंधाग्रमारोहमहं प्रसह्य ततोवहन्मां नभसः पथेन प्राप्तिष्ठितेनेन तनु प्र
विष्टः आनीय चेहाद्य विलोक्य युष्मान्मार्गे वनादौ वरतश्च तेन एतेन वेतालवरेण दैवसंप्रापितोहं तव पादमूलं समागतस्त्वं प्रभुनाहमद्यग
तः स चाप्येष समागतस्त्वमः इत्येवमेमानतुना शापाभवद्विधुक्तः सेमहात्तु देवः इति विक्रमकेसरिणो निजसचिवः श्रुतविप्रयोगदुःखेनातः मा
र्गां मृगांकदत्तो गच्छत्कांतानिमित्तमुज्जयिनीं पारावतात्स्य शापभ्रष्टमिलितकतिपयामात्यः सुमुदे सराजपुत्रः सभावितसकलसाध्यसंपत्तिः
इति श्रीभट्टसोमदेवविरचिते कथासरित्सागरे शशांकवतीलंबके द्वात्रिंशस्तरंगः ॥३२॥ इति वेतालपंचविंशतिकायां पंचविंशो वेतालः
ततः कथावसाने समार्गमध्यात्समुत्थितः मृगांकदत्तो मुदितः प्राप्तविक्रमकेसरी गुणाकरेण सहितस्तथा विमलबुद्धिना स विचित्र
कथाभीमपराक्रमसमन्वितः प्रचंडशक्तियुक्तश्च स्कंधाधिष्ठितसंगतः प्राप्तशापान्विचिन्वानः शापविश्लेषितान्सखीन् शशांकवत्याः संप्राप्त्यै प्र
गेवोज्जयिनीं प्रति गंतुं प्रवृत्तः पुनरप्युद्यच्चालान्नाष्टमः क्रमात्प्राप स च श्रीमच्छ्रुततो वामपादपा अटवीं चंडमार्तंडतापसंतप्तबालुकां तस्यां
व्रजन्स सचिवो राजपुत्रो जगाद तान् पश्यतेषाटवी कीदृग्दुर्गमा पतनभैरवा एषा हि विप्रदृष्टप्रायजनत्यक्तानिरुद्धया उद्यद्दुःखानलज्वाले
वाभितप्तमरीचिभिः विकीर्णवृक्षकेशाब्लुगोष्ठकुष्कममंद्रैः सिंहव्याघ्रादिविद्रासमसंत्रामाचेवस्करैः हहतीवातपाक्रांतजलकांक्षिमृगा
रवैः तदेषा तरयास्माभिर्लंघनीयाविषक्तया इत्युचिवान्सतैः सार्धं सचिवैः स्तुतभाषिभिः ततो मृगांकदत्तस्तामटवीमुदलंघयत् ददर्श चा

२२६

राम
८२

ग्रेसुमहत्सरच्छश्रीनैजंलेभ्रेतं सरोऽर्कतापगलितस्यामृतांशोरिवद्रवैः दिगंतव्यापिविस्तारंप्रतिविंबमिवात्मनः दृष्टंत्रैलोक्यलक्ष्म्येव वि
हितंमणिदर्पणं धार्त्तराष्ट्रकृतक्षोभविचित्रावर्त्तनविभ्रमं विश्रान्तिकृत्स्वादुरसंभारतानुकृतिंदधत् उपकंठमिलन्नीलकंठपीनविषान्नम ।
अच्युतनाश्रितलक्ष्मीकंमंथकालाद्रिसन्निभं सूर्यरश्मिभिरश्मिभिरप्राप्तगंभीरशिशिरान्तरं अनंतपद्मनिलयंपातालमिवभूमिगं तस्यतीरे
चसरसःपश्चिमेसव्यालोकयत् राजपुत्रःससचिवोमहान्तंदिव्यपादपं वातांदोलितविस्तारिशाखाभुजकदंबकं मूर्धलग्नाभ्रसरितंनृत्यन्त
वोद्वंस्लग्लादैधेनहव्यायास्मेवोढव आपः इंधानवःस्कपनसःस्कवीरग्ज्ञोग्जीवेमवलिहृतोवयंवः यन्मआपोयस्यपत्तस्यत्व
ष्याग्याद्गास्करारान्यस्योतविक्षवः तेनहन्मिसपत्नंदुर्मरायुमेनंदधामिनिर्ऋत्याउपस्थे तेजिष्ठाधस्तपनायाचरोचनाप्रत्यो
षतीस्तन्वोयाव आपस्ताभिर्वर्माएपभितोव्यथयध्व मावोरभन्यज्ञहनःपिशाचाः अभिद्रुतोवरुणस्यपापाशःउदकांतम।
भितिष्ठंते अभिषितस्यानु सपत्नीकानामयः मगाहुतिष्ठंतोवस्थ्येनचरंतित्वलंमहृत्यस्तोवमेवाधारयति स्रुवेणप्र
वायान्यमादायवैदेनोपयंप्यः प्रजापतयेस्वाहा प्रजापतयइदं० मनोसिप्राजापत्यंमनसामाभूतानाविशआयायतां
अग्नीदयःस्त्रुचिःसंमृष्टि आपोवाजिजितोवाजंवःसरिष्यतीर्वाजंजेष्यंतीर्वाजिनीर्वाजजितीःर्वाजजित्यायैसंमार्ज्म्य अ राम०
ग्नेरनीकमपआविवेशा अपांनपात्प्रतिरक्षंनसुर्यंदमेदमेसमिधंयक्ष्यग्ने प्रतितेजिह्वाघृतमुच्चरण्यत्स्वाहा वागस्याग्ने

यीतपत्नोक्षयिणीवाचामेंद्रियेणाविश इंद्रायेदं०अ०हिं हहम्राः मखस्यशिरोसि उर्जातंस्कधीरायुयज्ञेनयज्ञः संततः स्तु
घृतेप्रवरः घृतवतीशब्द इत्यादि अपवर्हिषः प्रयाजाञ्जुहूर्थेसर्वमोपभृतः समानयति प्रत्याक्रम्यशेषेणध्रुवामभिधा
र्य वारुणमभिधारयति नोपभृत आज्यभागाविष्टा आप्यायतांचत्वारि अग्नयेनुब्रूहि अग्निंयज अग्नयइदं अग्निनायज्ञः
आप्यायतांचत्वारि सोमायानुब्रूहि सोमंयज सोमायेदं सोमेनयज्ञः आप्यायतांमभिराप्यायतांयरवहानानि वरुणाया
नुब्रूहि वरुणंयज वरुणायेदं वरुणस्याहमन्नादः प्रत्याक्रम्य नारिष्टतस्विष्टकृतध्रौव समाप्तिः आप्यायतांपंचत्संमीमेकं
दशानेतनुवइत्यादि नारिष्टान्हुत्वाजुह्वामुपस्तीर्यकृत्स्नंवारुणमवदायद्विरभिघार्यध्रौवसमाप्तिः अग्नीवरुणाभ्यामनुब्रूहि
अग्नीवरुणौयज अग्नीवरुणाभ्यामिदं अग्नीवरुणयोरहमायुष्मान् नोत्तरंक्रियते यत्तेग्राव्णाविच्छिदुः सोमराजन् प्रि
याण्यंगानिस्वधितापरूंषि तत्संधत्स्वाज्येनोतवर्धयस्वा अनागसोअधमित्संक्षयेम यत्तेग्रावबाहुच्युतो अचुच्यवुः नरोयत्ते
दुदुहुर्दक्षिणेन तत्तआप्यायतांतत्ते निष्प्यायतांदेवसोम यत्तेत्वचंबिभिदुर्यच्चयोनिं यदास्थानात्प्रच्युतोवेनसित्मना त्वया

त्सोमगुसमस्त्कनः सानः संधासत्परमेव्योमन् आहाछरीरंपयसासमेत्य अन्योन्योभवतिवर्णोअस्य अस्मिन्वयमुपहूतास्तम
स्म आनोभजंसदसिविश्वरूपेष्वचक्षात्सोमउतशश्वगस्त मानोविहासीद्विरं आहरणानः अनागास्तनुवोवावृधानः आनोरूपं
वहतुजायमानः उपक्षरंतिजुह्वोघृतेन प्रियाण्यंगानितववर्धयंति तस्मैतेसोमनमइद्वषट् उपमाराजन्सुकृतेह्वयस्व संप्राण्ण
पानाऽप्यासमुचक्षुषात्वस ऽश्रोत्रेणगच्छस्वसोमराजन् यत्रआस्थितऽशप्रुतस्तेअस्तु मानीतान्नः संगमनेपथीनां एतेंआ
नीतात्परमेव्योमन् हृकाःसधस्थोविरस्तपमस्य यत्रागच्छात्पथिभिर्देवयानैः इष्टापूर्तेकृणुतादाविरस्मै अरिष्टोराजन्नगदः
परेहि नमस्तेअस्तुचक्षुषेरुप्यते नाकमारोहसहयजमानेन स्वर्गगच्छतात्परमेव्योमन् अभूद्देवःसविताबंद्योनुनः
इदानीमह्नउपवाच्योनृभिः वियोरत्नाभजतिमानवेभ्यः श्रेष्ठंनोअत्रद्रविणंयथादधत् उपनोमित्रावरुणाविहावतं अन्वा
दीध्याथामिहनःसखायः आदित्यानांप्रसितिर्हेतिः उग्राशतापाष्ठाघविषापरिवोवृणक्तु आप्यायस्वसमेतुतेविश्वतःसोम राम०
वृष्ण्यं भवावाजस्यसंगथे संतेपयांऽसिसमुयंतुवाजाः संवृष्ण्यान्यभिमातिषाहः आप्यायमानोअमृतायसोमदिविश्रवां

सुत्रमानिधिष्ठ दधोर्दुंवरशाखायऋजीषमोक्षति प्रहृत्यवाभिजुहुयात्वुदुन्नीयस्यस्कचं प्ररद्त्वा समुद्रेतहृदयमप्स्वंतःसवा
विशंत्वोषधीरुतापोयज्ञस्यत्वायज्ञपतेहविर्भिः सूक्तवाकेनमोवाकेविधेम अवभृथमारयति अप्सुधौतस्यसोमदेवतेनृभिःसु
तस्येष्टयजुषस्तुतस्तोमस्यशक्थ्योस्तोक्थस्ययोभक्षोअश्वसनिःर्योगोसनिःस्तस्यतेपितृभिर्भक्षकृतस्योपहूतस्योपहूतो
भक्षयामि भक्षयित्वा समुद्रवः प्रहिणोमीस्वांयोनिमपिगच्छत अच्छिद्रःप्रजयाभूयासंमापरासेःचिममत्यपः सर्वाणिच।
मसोमलिम्लान्यवभृथेप्रविध्य विषितोवरुणस्यपाशः यजमानोमेखलांविसृजते इमंविष्यामिवरुणस्यपाशंयमबध्नीतसवि
तासुकेतः धातुश्चयोनौसुकृतस्यलोकेस्योनंमेसहसहपत्याकरोमि पत्नीयोक्त्रं अत्रयोक्त्रंमेखलेवाससीजालंकृष्णाजिनं
चावभृथेप्रविध्यादेवीरापएषवोगर्भःस्तंवःसुभृतमकर्मदेवेषुणःसुकृतोकृतोब्रूयात अवभृथंयजमानोभिमंत्र्य सुमि
त्रियानआपओषधयःसंतुदुर्मित्रास्तस्मैभूयास्तुर्योस्मान्द्वेष्टियंवयंद्विष्मः सशिरस्कावनुपप्स्नातौस्नातावुभावाचम्यापोभी
तःपत्नीयजमानस्यान्योन्यस्यपृष्ठेप्रजावतः यद्दृष्टिःसमनसायच्चवाचायत्प्राणेःचक्षुषायच्छ्रोत्रेण यद्रेतसामिथुनेना

पाप्मना अद्द्योल्नोकाकाद्धिरेतेजइंद्रियं शफ्कादीक्षायैतपसोविमोचनी आपोविमोक्त्रीर्मयितेजइंद्रियं यदृचासाम्नायजुषांप।
स्तांचर्महविषादिदीक्षे यच्छंदोभिरोषधीभिर्वनस्पतौ अद्भ्योल्नोकाद्धिरेतेजइंद्रियंशफकादिक्षायैतेजइंद्रियं यदृचासाम्ना
यजुषापशूनांचर्महविषादिदीक्षे येनब्रह्मयेनक्षत्रंयेनेंद्राग्नीप्रजापतिःसोमोवरुणोयेनराजा विश्वेदेवाऋषयोयेनप्रा
णाः अद्भ्योल्नोकाद्धिरेतेजइंद्रियं शफकादीक्षायैतपसोविमोचनीः आपोविमोक्त्रीर्मयितेजइंद्रियंनांचर्महविषादिदी
क्षे यच्छंदोभिरोषधीभिर्वनस्पतौ अग्नेरंजनिनाविषिच्य उम्नेलर्वसीयोनउन्नयाअभ्युदितेवरुणविन्नसा गिरस्तोमासर्द
रतःअसवाजितोधनसाअक्षितोतयोवाजयंतोरथाइव कल्वारवप्रगवः स्पर्धीरवविम्बमिधीतमानुशुः यजमानःसं
प्रेष्युउदेतस्नामायुर्वर्चैरधानाअधस्यामस्फरभयोगहेषु गायत्रीछंदाऽ स्युनुसऽ रभंतामस्माद्वायपउनयत्ताःसजंताऽ
स्पीतःस्वरप आविवेश उग्नेतोत्र्यति अहतःसोमोराजाउदितस्तोमोस्नीषंयजमानः परिधत्तेसोमोपनहनंपत्नीसो राम०
मपरिश्रयणंवानेउदवसानीयायामध्वर्यवेदतः उद्वयंतमस०मं आदित्यमुपस्थाय प्रतिमुक्तोवरुणस्यपाशः प्रत्यस्तोव

हगस्यपाशः उदक्रांतं प्रत्यसितासमित्यागत्य उ नेतारं पुनस्कृत्या प्रतीक्षमायंति अपामसोमममृता अभूमागन्मज्योतिरविदा
मदेवान् किंमस्मान्कृणवदरातिः किमुधूर्तिरमृतमर्त्यस्य महीयान्वदंतः यान्यपामित्यान्यप्रतीतान्यस्मि यमस्यबलिना
चरामि इहैवसंतः प्रतितद्यातयामोऽजीवाऽजीवेभ्यो निहराम्येनत् अनृणा अस्मि० येम इतिचुवदंतोप्रतीक्षमायंति अरेवय
ज्ञनंप्राप्य पादौप्रक्षाल्याचम्य येपोस्येधिषीमहि समिदसि तेजोसितेजोमयिधेहि अन्वचारिषं रसेनसमसृक्ष्महि पयस्वा
ऽअग्नआगतंमासंसृजःवर्चसा उपतिष्ठंते प्रायणीयाउदयनीयापास्तस्यामेवस्थाल्यांपनिष्कसितायाः श्रपयति तद्
र्हिःसन्नेस्त्रणंशाम्लाभुखीये प्रचरंतिउत्तरेणगार्हपत्यमित्यादिपौर्णमासंतंत्रंबर्हिराहृत्यव्रतप्रवेशः पंचदशसामिधेन्यः य
स्यकस्यचित्काष्ठस्योपवेषः अलंकृत्यपरिस्तरणं देवादेवेषुकर्मणेशं पात्रप्रयोगकाले स्फ्यश्रुकालंचाग्निहोत्रहवणीचप्र
पंचकृष्णाजिनंचदर्भचोल्खलंचमुसलंचपुरतः पत्नीन्वाहार्यस्थालीवर्जं पित्र्यांणिप्रकृतिवत् योक्त्रंचप्रयुनक्ति पवित्रे
कृत्वापनमानवाचंयच्छसंविशंतामित्यादिनिर्वापकाले देवस्यत्वाहस्ताभ्याममदित्येजुष्टंनिर्वपामि आदितेहव्यंरक्ष अदि

तेहव्यंरक्षस्व आदित्यैवोजुष्टंप्रोक्षामि उत्करेत्रिर्निनीय ध्रुष्टिरसिब्रह्मयच्छेत्यादि ध्रुवासीतिस्थालीमुपदधाति रक्षानामुत्पवन
कालेतंडुनाकृतानुत्पुनाति देवोवःसवितोत्पुनातु स्थाल्यांपयआसिच्य देवस्त्वासवितोत्पुनातु घर्मोसिविश्वायुः स्थाल्यांतंडुलाना
वपति अंतरितं अविदहंतश्रपयत: संप्रेषकालेप्रोक्षणीरासादयेध्माबर्हिरुपसादयस्रुवंचस्रुचश्चसंमृड्ढिपत्नीं संनह्या
ज्येनोदेहि प्रोक्षणीरभिसर्वेत्यादि आशासाना पत्नीं संनह्यति आज्यग्रहणकालेप्रकृतिवदाज्यग्रहणं उद्वासनकाले।
आप्यायतांतेजसादित्यैजुष्टमभिधारयामि आद्रोध्रुवनस्येतिचरोरुद्वासनं देवस्त्वासवितामध्वानक्तु त्वमित्यभिसूर्यंतेचक्षुः
पदोद्वामायणीयमासादयति यज्ञोस्यंयजेतामस्मा ग्नेचतुर्होता वेदनिधानादिप्रयाजान्निष्कोपम्नतंनतद्गुनिलस्वानसचोःसार
नंते वैवदेवेषुअग्निमाज्यभागानांप्रथमंप्रथमंयजतिपथ्यांस्वस्तिमुत्तमां आप्यायतांचत्वारि अग्नयेअनुब्रूहि अग्निंयज
अग्नयइदं० दध्रिरसि आप्यायतांचत्वारि सोमायाअनुब्रूहि सोमंयज सोमायेदं दध्वरसि आप्यायतांचत्वारि सवित्रेअ राम०
नुब्रूहि सवितारंयज सवित्रइदं दध्रिरसि आप्यायतांचत्वारि पथ्यायैस्वस्तयेअनुब्रूहि पथ्यांस्वस्तिंयज पथ्यायैस्वस्त

हंसत्व मित्यादि मन्त्रमेवाहरति अदित्यैरास्नासि अन्तुभिताप्ये निःइंडमप्ये संजहन मित्यादि पाआता ओषधय इत्यादिने भःस्वपावेदिं अं
तर्वेदिशास्त्वयाइत्यादिनपर्णवल्कः पयोहयंकरोतुमे कुंभ्यालेपनंतेरमो पर्णंचवायवस्थः परिस्तरणीतदेवादेवेषुकर्मणेवोपा
त्रमयोगकालेस्फ्यमग्निहोत्रहवणीमपरन्तः स्रुवंजुहूमुपभृतंध्रुवांवेदमाज्यस्थालीमिडापात्रंवेरुयाणियोक्षंच प्रातर्दोहपात्रा
णिच पवित्रेक्षसा यजमानवाचंयछ संविशंतां अग्निःहोतारंकस्त्वायुनक्तिसत्वायुनक्तु अग्निहोत्रहवण्यामपआनीय सर्वद्वंदुस्
याभिमंत्र्यंब्रह्मन्प्रोक्षिष्यामि ॐप्रोक्षरंधधं प्रोक्षणोशेषमग्रेणगार्हपत्यंनिधाय प्रातर्दोहकर्म एताअचरंतीत्यादि सं
स्पात्रनिनयनांतं कामधुक्ष्वमणोऽहि मित्रावरुणाभ्यांहविरिंद्रियं दुहुदुग्धिमित्रावरुणाभ्यांदेवेभ्योहव्यं तमेप्रातर्दो
हेलोकिकंदध्यानयति अंतरितंअविदहंतश्चपयतनत्स्रौस्फ्यमादायप्रोक्षणीशेषंसदोहविर्धानयोमध्येनिधाय स्फ्यंतिर्य
चःसन्ध्यातंप्रेष्यति प्रोक्षणीरासादयबर्हिरुपसादयस्रुवंचस्रुचश्चसंमृड्ढि पत्नीःसन्नह्याज्येनोदेहि प्रोक्षणीरभिपूर्यादि राम०
आशासाना पत्नीःसन्नह्यति आज्यग्रहणकालेस्रुवापमेवगृह्णाति भुमआज्यायतारायस्योषायस्त्वाग्नंसुवर्चसम्पताभ्रू

येइदं इत्ति आप्यायतांनुह्वामुपस्तीर्येत्यादि अदित्येअनुब्रूहि अदितिंयज अदित्यायाइदं॰ अदित्याअहंदेवयाप्रजयाचप
शुभिश्चनुनिषीय अदितिमिष्ट्वा मारुतीमृचमन्वाह मरुतोपत्थवोदिवःसुम्नायंतोहवामहे आन्तूनउपगंतन मत्याक्रम्यनारिष्ट
कृतःस्विष्टकृतध्रौवसमाप्तिः आप्यायतांपंचतरूणीमेकंद्यातेतनुवइत्यादि नारिष्टात्सुत्वानुह्वामुपस्तीर्यउत्तरार्धात्सकृदवद्यं
स्विष्टकृतेचद्विपहिरभिघार्यध्रौवसमाप्तिः अग्नयेस्विष्टकृतेनुब्रूहि अग्निंस्विष्टकृतंयजअग्नयेस्विष्टकृतइदं॰ अग्नेस्विष्टकृ
तोहमायुष्मान् सामेसत्यासीराशीर्मकृन्त्वित्येतेविधेतेचतुर्धाकरणकाले त्रेधाकर्णंबभ्रपिन्वस्वेत्यादि सूक्तवाके अग्नय
इदं॰ सोमायेदं सवित्रइदं पथ्यायैस्वस्तयइदं अदित्याइदं अदित्या अहमन्नितिमन्तूज्योषं देवेभ्यआज्यपेभ्यइत्यादि
शंयुवंतासःस्वावांतोदयनीयासंतिष्ठते त्वसंयोक्तुविमोकः मैत्रावरुणीमामिक्षामानुवंध्यायास्थानेवहुरुवा समामनंति
तस्याःकर्मादिषेतोर्जेत्वा इमांप्राचीं यजमानःपवस्वतीरोषधयः इत्याद्यादित्योपस्थानांते उत्तरेणगार्हपत्यमित्यादिमस्त
रमेवाहरति अदित्यैरास्तासि अक्षुभितायोनिःरंद्राऐपेसंन्नहनमित्यादियाजाताओषधयइत्यादित्योपस्थानांते उत्तरेणगा

শ্রীকৃষ্ণায় নমঃ ॥ মত্তমত্তশ্বেতবদনে পাদিত বিদ্রাবনীসদন । গৌরীবরলোলুভোত্তং পাণিস্বলোকং হৃদনবন্ধে ॥ কল্যাণিবাণি
নিজপাণিতবপাণিশরোজযুগ্ম মাঙ্গদেনিকরবাণিভয়প্রণাম । মত্তমত্তমত্তননমদমনাশীপজ্জেন্দ্রমেঘনিনমিন্দ্র
শ্বরমানুস্ত্রিকং ॥ সন্তানকল্পতরুমস্তুপমাপ্তিভাষাং শ্লোকান্ কুমননবাণ্ডনবোদিকায়াং গীতারশ্মিপ্রিহকরাকনিষ্ঠ
কপালিবিবাহহোমসমসে দিশতাক্ষুতানি ॥ কুলমণ্ডপান্ বিদ্যোতিস্মৃতিনিশিতোদ্ধিষু প্রাচীমবাক্ষমন্দতত্ত্ব
দর্শয়িত্বমারভে ॥ ইহ হি শিষ্টাঃ প্রকৃতিপ্রেক্ষ্য দেবতানমস্কারাদিকং পরিপালনমাচরন্তি তথাস্মাকমপি নীলোৎপলাদি
তবির্জিতবদ্ধাম্যক্রত কুসুমগণপাশাদিং ধ্যাতিপ্রপত্তুঃ স্বাভীষ্টদেবতাস্মরণমাশী রূপং বস্তুমঙ্গলমাচরন্তি শার্দূলবি ১
ক্রীডিতেন ॥ ॥ গণেশ্বানুসমনেকভানুচ্ছটেরাজৎকনাধারিণি শোভমানকরীযুগম্মরদনং পায়াৎ হরীরাব
নিঃ । শৃঙ্গারোক্তগিরিদ্যুমার্বরচঞ্চরীদীনাকানিন্দাম্বুজাপন্দাচক্রোমিদং শিবাস্মিতিবদনং ক্ষের : শিবঃ পাতুবঃ ॥ ১ ॥
ক্ষের : সস্তাস : শিরোমুকুটাবান পাতুর ক্ষেত্রকি নিবদ্ধঃ : শিবা গৌরীস্মিতিবদনং ক্ষেমোর্ধিং দশাশ্চর্য্যং চ্ছেত্তুকং পাঠ
বনোকর আশ্চর্য্য মেব বর্ষ যতি অনেকভানুজ্জটায়ে অনেকসূর্য্যোদ্বেরপাটং নিবিষ্টেষাং নমস্কারং পশ্যেৎ তে
স্মিরেণ গৌরীমস্তুকশ্রুরম্রথাদি শশ্ব মুকুটানুপ্রাপ্তিনীনানকর্কণ্ঠ অনেকরাজৎকনাধারিণি বিনয়ং পূর্ণং চ

[illegible]

গ্রাবাণমুপস্পৃশতি। যদ্যদগৃহীতাজঃ বিন্দুঃ প্রস্কন্দেদ্দ্রপ্সুকঃ পা [illegible] ক্বন্যাস্ত্বৈর্যদি স্থিরমবর্দ্ধকোনসাদয়তিদ্রো। প্রতপ্রেত্থবনীয়ো
স্পৃড্র ধসি দ্রোণকলশং। পরিপ্লবরশ্মিঃ সর্ব্বমেষ্টং রাজা। আগ্রানেমেবর্ষ্ঠোদাবর্ষ্ঠসেপবস্থ। আগ্রয়ণং প্রক্ষৈমে° দ [illegible] সাদ
যতি। দর্ব্বিষ্ট্রং জুনতাপিধায়োভিতিষ্ঠতি সূর্য্যোমাদেবোদেবেভ্যঃ পাতু বায়ুরন্তরীক্ষাদ্যজমানোঽগ্নির্মা পাতু চক্ষুষঃ। সপ্ত সূর্যসি
বিতথিরিস্বতাধিণ এতেভিঃ সোমনামধি বিধেশাতো। এষ্টপরস্যাদস্যবৈলোদষ্টং জ্যোতি যাবিতমোঽববারয়দন্তরীক্ষং স্থদুমেপি

मतिः कुपथंते चज्ञानीपाद्रोविंदरहिणागममितिवाक्यार्थेत्याहुः पदेवेत्यादेस्तु विष्णुरिह संसारे
मत्स्यादिरूपेणास्यनोदेहादिषुचीनपामितिपास्थितः सएवविष्णुरमुत्रपरलोके नारायणाभिधमू
लरूपोपरएवमूलरूपः सएवमत्स्यादिरूपः पः पुरुषोगुणातः स्वरूपतश्चाभिन्नं परमात्मानं पश्यतिसत
सतमोघं पाति तथैवेतद्युलतपवपवानोगुणानोचभेदं पश्यतिसमत्योः सकाशान्मत्युंगच्छतीत्य
र्थः पः प्रादुर्भावयोगोविष्णुर्देहादिषुचसंस्थितः सएवमूलरूपश्चसाक्षान्नारायणाभिधः मूलरूपश्च
पे। विष्णुः प्रादुर्भावादिकश्च सः गुणातीतरूपत्तोवापि विशेषं पात्र पश्यति· अत्यल्पमपि मत्त्यापितमो
घं पात्मसंशयमितिमात्स्यवचनादयमेवार्थः समीचीनमितिबोध्यमितिमाध्वाः गुरुचरणास्तुयोरामरह
संसारेचिरदिव्यशरीरतयाविहरतिसएवानंदविग्रहेणामुत्रपरलोकेपीतिपः परलोके विहरति सएवे
हेति· पः कोपिरामस्यचिज्जडशरीरत्वेनजगत्पश्यतिकिंतुनानापश्यति अथवामायासबलिते ब्रह्मे
वजीवरूपेणनानापश्यतिसमत्योः सकाशान्मत्युमाप्नोतीत्याहुः यदाह्येवैषइत्यादेरर्थस्तु· एवोजीव
एतस्मिन्नरमात्मन्युदरमल्पं··· नरंकुरुतेथतस्यभयंभवतीति भगवद्विग्रहज्ञानेनजगतोनानात्वद
[illegible] मंतरं [illegible] तस्यभयंभवतीत्येव [illegible] ज्ञानम्यइतिकेचित· गुरुचरणास्तु· एदेषोजी

इयश[illegible]ारतं[illegible]नदेत:
यिब्रह्मस्तथापिसंज्ञाभावांकुधनंविज्ञानानांविजानीयात· तस्मादियंश्रुतिस्त्वत्तिब्रह्मप्रतिपादिकेव
मनुमतिप्रतिपादिका अनेशावान्नमुक्तिरित्यादिश्रुत्या विनास्ताने सर्वजीवानामेकदैवमुक्तिरसंभवादित्या
हुः। इतोऽन्यदार्त्तंसर्वमित्यत्राप्यतज्जगदार्त्तंदुःखीत्येवार्थः गुरुचरणास्तुः इतोब्रह्मणोऽन्यस्मिन्नंजग
तआर्त्तमस्तः अतएवात्मवार्थेऽरार· यद्वाइतोब्रह्मणोभिन्नंसर्वजगत् अन्यदामोक्षकालेऽपिआर्त्त
मस्यमित्याहुः ब्रह्मलोकमित्यादेस्तु अतएवसन्नतावाशीतिभगवद्वाक्यात्भिन्नमपिप्रमसत्यवाक्यम
नतमुच्यते· तेनप्रजाः प्रसृष्टाः ब्रह्मलोकंनविदन्तीत्येवार्थइतिकेचित् गुरुचरणास्तुः अनेनप्रसूताः
प्रजाइत्यादेस्तु· अनेनजगदादिमिथ्येतिवादेनप्रसूता आच्छादिताःप्रजाः ब्रह्मणोलोकमपराजिता
त्पेनविदन्तीत्यर्थमाहुः अथयोऽन्यांदेवतामित्यादेरर्थस्तुः अन्योसौदेवः सेव्योऽन्योऽहमस्मिसेवकइति
मत्वापरमेश्वरादन्यांदेवतामुपास्तेनसएवपशुस्तेननविदन्ति· गुरुचरणास्तु· अथस्तानांनंनरंयः कोपिअ
सौअन्यउपास्योऽन्योऽहमुपासकोऽस्मीतिमत्वाऽन्यांदेवतामुपास्तेसश्रुतिनात्मपर्नवेद· अयंभा
वः चिरचिद्धिग्रहणेनस्वस्मिन्नन्यत्रचपरमात्मानंनपश्यतिश्रीरामंत्यक्त्वान्यांदेवतामुपास्तेसपशुरेवे
तिदेशोऽमत्वादेवंपजेनेतिश्रुतेः वासुदेवंपरित्यज्ययोऽन्यदेवमुपासते· तृषितोजान्हवीतीरेकूपंखनतिदु

इवशब्द पारतंत्र्यार्थकः ननदेतरः पुमानितरं गंधादिकं जिघ्रति यदापदि मुक्तावस्थाज्ञानिनः सर्वकरणादि
कमात्मैवाभूत· स्वव्यतिरेकेनाकिमपि नासीत् ननतर्हि केन करणेन कं जिघ्रेदित्यादिर्क्षेपः एतेन मुक्तावात्म
मात्राचशेषेणाद्विनोपस्य भावान्ताना भावो मुक्तस्येति परास्त गुरुचरणास्तु: पत्रहि द्वैतमिव भवतीत्या
देः पूर्वपरवाक्यपर्यालोचनेन द्वैतनश्वनात्मपर्यंतथाति यथा न स्येव द्विन्नं सैंधवशकलं जलमेव भ
वति ननस्य पार्थक्येन ग्रहणं घ्राणोपनीतगस्त्रीपानतस्तेनः सजलत्ववणस्येव ग्रहणं· तथाभूतसंघात्स
मुत्थापानेन नमप्रारंभहभूतं जीवसमूहरूपं विराहभूतसमूहादर्शनसमनंतरमेव विज्ञानघनेवसारी स्वपम
दर्शनं प्राप्य संलीयपश्चको नावराहो वा सिंहो वा मशको वेत्यादिसंज्ञा न लभन्ते: तत्रापि भिन्नतयेव तिष्ठतीति
सैंधवदृष्टान्तेन सूचितं· न· न चाचमरुभूतशब्देन भूतनस्य सर्वत्र पूर्णत्वेन समुत्थानासंभवात्· तत्र
संशंका मैत्रेय्युवाचात्रैव मा भगवानमोहपधदमुत्रेन संज्ञास्तीतिन इच: श्रुत्वा तामुवाच याज्ञवल्क्यो नाहं
मोहदं वाक्यमब्रवं ने विज्ञानायेतावदेव बहु: तथाहि यदा यत्रहि समये द्वैतमिव भिन्नं भवति तदेतर इतरं
भिन्नं जिघ्रति पश्यतीत्यादि· यदा तु अस्य समये ऽस्य जीवस्य सर्वकरणादिकमात्मैवाभूत् तदा कः पुरुषः
तेनेदिदेन केविषं विजिघ्रेदित्यादि· यदे [illegible] चैतन्येन जीवः सर्वं विजानाति तमंतर्यामि/णां पश्य राम

॰मितिचेत् तस्यैव विजातीयत्वप्राप्तेः तन्मेदस्याप्यात्येन भेदस्यासत्त्वप्रसंगाच्च· मिथ्यासत्ययोरैक्ये
इदं मिथ्येति भेदाभावात्· जीवेश्वरयोर्भेदोऽपि मिथ्यात्वप्रसंगः तस्माद्ब्रह्मतोऽन्यानित्यस्यैतदपि
न युज्यत इति बोध्यमिति मध्वाः गुरुचरणास्तु· यदा सर्वपदार्थस्य ब्रह्मणोऽभेदस्तदा सर्वं जगत्तस्मिन्
भिन्नत्वं पातिघ्नीति सदेवेत्यादिश्रुतिर्दर्शयति· तथाहि हे सोम्यास्तवः पूर्वमिदं जगदेकमद्वितीयं भूत्वा
सदेवासीत्· सन्नामकमेवासीन्नान्यन्नामरूपं गृहदारा इति वदिस्याहुः नेह नानास्ति किंचनेत्य
स्यार्थस्तु· इह ब्रह्मणि अवयवगुणक्रियादि नानाभिन्नं किंचन नास्ति· अथ येह ब्रह्मणि यदस्ति
तन्नानाविजातीयं भिन्नं नास्तीति अन्यथा किंचिदपि नास्तीत्येवं वदेत्· य इह ब्रह्मणि नानाविजातीयं
भिन्नं पश्यति स मृत्योः सकाशान्मृत्युमाप्नोतीत्युत्तरार्द्धस्यार्थः· गुरुचरणास्तु· इह ब्रह्मणि नामरूपवि
भागार्हस्यापि जडात्मकस्य जगतो महाप्रलये नामरूपं किंचिदपि नानाभिन्नं नास्ति किंतु तस्या ब्रह्म
णा एव नामरूपमस्तीत्यर्थः· शात्मकेत्यादिनिषेधकत्वकस्यानेनुतमात्मस्थं येऽनुपश्यन्ति धीराः एतन्मन्त्रोपनि
त्वमेयात्मसंस्थमित्यादिश्रुतेरर्थविरोधापत्तिः स्यादित्याहुः यद्वा हिहेनमिवेत्यादेरर्थस्तु· यत्र यदा हि
तद्वयोर्भावो द्विजनाभेदस्तस्माद्द्वैतं भिन्नं वस्तु द्वैतं। भिन्नं यस्तु द्वैतमिव भिन्नमिव परं तत्रैव वस्तु भवति·

स·सि· त्यर्थः अयेवशब्दः सादृश्यार्थवाइतिपूर्ववद्व्याख्याने बोध्यमिति माध्वाः गुणतश्चरणास्तु ब्रह्मविद्
३८ ब्रह्मैव भवतीत्यस्य ब्रह्मवेत्ता ब्रह्मैव भवति जीवस्य परावरज्ञानात् देव भक्तिस्तपाच परमात्मनं तत्त्वतो ज्ञात्वा
ब्रह्मसमीपं प्राप्नोतीत्यर्थः ब्रह्मभूतः प्रसन्नात्मेत्यादि पूर्वोक्तगीतावचनात् अत्र भावनया ब्रह्मत्वं अ
पचाद्ब्रह्मैव भवतीत्यस्य ब्रह्मगुणको भवतीत्यर्थः अथवा ब्रह्म उच्यते ब्रह्मेति बृहन्तो ह्यस्मिन्गुणा इति श्रुते
रेवं ब्रह्मैव सन् ब्रह्माप्येतीत्यत्रापि बोध्यमित्याहुः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यस्यार्थस्तु
हे सोम्य अस्य प्रपंचस्याग्रे सन्नामकं ब्रह्मैवासीत् सर्वोत्तमत्वात्सन्नामा हरिर्नोरापराः प्रभुः। सोसृजत्प्र
थमं दिवि तेज आद्यं व्याप्तिवं सतीमिति स्मृतेः कीदृशं ब्रह्मतत् एकं स्वीयगुणकर्मरूपादिभेदहीनं स्वगतानां च भेदा
नामभावाद्ध्लश्राभ्यनमिति स्मृतेः एवकारस्तु भेदाभेदनिवृत्त्यर्थकः भेदाभेदनिवृत्त्यर्थमेवशब्दोऽवधारक इ
ति स्मृतेः अद्वितीयं समाधिकरहितं समाधिकनिवृत्त्यर्थमद्वितीयपदं न चेति स्मृतेः एकएकवाद्वितीयो
भगवान्न तत्सदृशः परो नास्तीति श्रुते न तत्समश्चाभ्यधिकश्च दृश्यत इति च न हि विजातीयभेदवर्जी
नेकिंचित्समारामात्ति किंच विजातीयाभावे येनाश्रुतं श्रुतं भवतीत्यादि विशेषणं व्यर्थं स्यात् किंच य
७८ स्यवास्यविज्ञानेन ज्ञानमेव भवति तथाऽज्ञानमपि ज्ञानमेव भवति भेदाभावात् न च मिथ्यास

र्व्वातिकेपि ब्रह्मव्यतिरेकेणाकार्य्यजातस्याभाव इति गम्यते· इति द्वितीयस्यार्थः तथा च भो पुत्र राजेन्द्र आग्रहं त्य
क्त्वा पूर्वोक्ताश्रुतिस्मृतिसूत्राणामनुसरन्नद्वैतमतं स्वीकुर्व्विति· भो विप्रवर्य्य· श्रुतिस्मृतिसूत्रप्रमाणैस्त्वया जी
वस्य मिथ्यात्वप्रतिपादनं कृत्वाद्वैतमतं स्वीकुर्व्विति यदुच्यते· तन्न सम्यक्· अद्वैतस्य काल्पितत्वात् भो रा
जकुमार अद्वैतस्य काल्पितत्वे श्रुतिस्मृतिसूत्राणां काल्पितत्वस्यात् काल्पिताद्वैतप्रतिपादनात्· तस्माद द्वैतं
काल्पितमिति न वक्तव्यम्· भो विप्र मायावादमतपक्षावलम्ब प्रच्छन्नबौद्ध यदुच्यते मयेव काल्पिते द्वैविकल्पो
ध्यात्मरागाद्यपितोत्पादिस्मृत्याद्वैतस्य काल्पितत्वमेव: पूर्वोक्तानां श्रुतिस्मृतिसूत्राणां तु सत्य आत्मा सत्यो जी
वः सत्यं भिदा सत्यं भिदा इति श्रुत्या सर्वेश्वरस्य जीवस्य सत्यो भेदो विनिरूपणात् एवमेवतिमेयाचं सत्यो कर्न्ने
मिलर्हंसोति स्मृत्या च सत्यमद्वैतप्रतिपादनेनास्पर्द्धी· तथा हि· ब्रह्मविद्ब्रह्मैव भवतीत्यत्र यथा वा तथैवै
वं साम्ये इत्यनुशासनादेवशब्दस्य सादृश्यपर्य्यायकत्वेन ब्रह्मेव ब्रह्मसदृश इत्येवार्थो ऽन्यथा निरंजनः परमं
साम्यमुपैतीति· यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति· एवं मुनेर्विजानत आत्मा भवति गौतमेति· इदंज्ञा
नमुपाश्रित्य मम साधर्म्यमागताः सर्गेपि नोपजायन्ते प्रलये न व्यथन्ति चेति श्रुतिस्मृतिविरुद्धं स्यादिति
गौडाः ब्रह्मैव सन् ब्रह्माप्येत्यत्र ब्रह्मशब्दो जीवे एवोपपद्यते चाविरोधे· तथा च जीव एव सन् ब्रह्माप्येती

नैनौपश्यति बवपश्चिद्दं जातु मनागपि अस्यार्थस्तु स्पष्ट एव· अविभागेन दृष्टत्वात्· तदनन्यत्वमारंभण
शब्दादिभ्यः। परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते यः स किं परस्मादात्मनः पृथगेव भवत्युतावि
भागेनैवावतिष्ठत इति विचिकित्सायां सत्यां तत्र पर्यैतीत्यधिकरणाधिकर्त्तव्यनिर्देशाज्ज्योतिरुपसंपद्येति च
कर्तृकर्मनिर्देशाद्भेदेनैवावस्थानमिति यस्य मतिस्तं व्युत्पादयति अविभक्त एव परेणात्मनावतिष्ठते कु
त दृष्टत्वात् तथा हि तत्त्वमस्यहं ब्रह्मास्मि· यत्र नान्यत्पश्यति न द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदि
त्येवमादीनि वाक्यान्यविभागेनैव परमात्मानं दर्शयंतीत्याद्यस्यार्थः· यस्मात्तयोः कार्य्यकारणयोरनन्य
त्वमेव गम्यते· कार्य्यमाकाशादि बहुप्रपंचं जगत्· कारणं परं ब्रह्म· तस्मात्कारणात्परमात्मनोऽनन्य
त्वं तद्व्यतिरेकेणाभावः कार्य्यस्यावगम्यते कुतः आरंभणशब्दादिभ्यः· आरंभणशब्दस्तावदेकविज्ञाते
स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति· एतदुक्तं भवति· एकेन मृत्पिंडेन परमार्थतो मृदात्म
ना विज्ञातेन सर्वं मृन्मयं घटशरावोदंचनादिकं मृदात्मत्वाविशेषाद्विज्ञातं भवेत्· कुतः वाचारंभणं विकारो
नामधेयं वाचैव केवलमस्तीत्यारभ्यते· विकारो घटः शराव उदंचनं चेति न तु वस्तुवृत्तेन विकारो नाम कश्चिदस्ति
नामधेयमात्रं ह्येतदनृतं मृत्तिकेत्येव सत्यमिति· एष ब्रह्मणो दृष्टांत आम्नातस्तत्र श्रुताद्वाचारंभणशब्दा

तिरात्मनिः इदं गुणमयं (प्र प्रकृतिस्तु सर्वशः आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः) विद्धि त्रिविधं मायया प्राकृत
मिति ननु यतो वा इमानि भूतानि जायन्ते इत्यादिश्रुतिविरुद्धत्वात्त्वत्पक्षं द्वैतमत्र तत्राह आत्मैवेति ननु कर्तु
रेव कर्मत्वं विरुद्धं तत्राह तस्मादिति आत्मनोऽन्यो भावोऽर्थो यस्मान्न इति विद्भिर्निरूपितः किंत्वात्मैव वयि
श्च कर्त्ता कर्मभूतं विश्वमिति निरूप्यते तर्हि विषयापत्तिर्नेत्याह अन्यस्मादिति विकारस्य स्वप्नादिस
र्थः तर्हि कर्मत्वं कथमुच्यते तत्राह निरूपितेति त्रिविधा सात्त्विकादिभ्रमा भान्ति निर्मूलाः नहि रजतभ्रमे शु
क्त्यज्ञानादन्यन्मूलमस्ति तदेवाह इदमिति मायया प्राकृतं अविद्याप्राकृतमित्यर्थः एतद्विद्वान्मदुदितं ज्ञा
नविज्ञाननैपुणं न निन्दति न च स्तौति लोके चरति सूर्यवत् प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा आद्यन्तवदस
ज्ज्ञात्वा निःसंगो विचरेदिह एतस्यानर्थजालस्य निवर्तनायोपायमाह एतदिति मदुदितं मदुक्तप्रकारं सूर्यवत्
समो भवेत् ज्ञानविज्ञाननैपुणं तल्लाभोपायमाह प्रत्यक्षेणेति प्रत्यक्षेण घटादि अनुमानेन सावयवत्वेन दृश्यं
पृथिव्यादि निगमेनात्यन्तसूक्ष्ममाकाशादि आत्मसंविदा स्वानुभवेन सर्वं दृश्यमाद्यन्तवदसच्चेति ज्ञात्वा निःसं
गो विरतः सन् विचरेदित्यर्थः क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत न तदस्ति विना यत्स्यान्मया भूतं चराचर
मिति यच्चराचरं जगत् मया विना भूतं तन्नास्तीत्यर्थः ऽन्यत्स्य [illegible] अहं भवान्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भो

वेदेति १९ सर्वंखल्विदंब्रह्म २० यथास्यंदमानानद्यः समुद्रेऽस्तंगच्छंति नामरूपे विहाय एवं नामरूपा
प·सि· द्विमुक्तः परात्परं पुरुषमुपैति दिव्यमिति २१ अहंब्रह्मास्मि यःसोऽहमस्मि २२ परेऽव्यये सर्व एकीभवंति
३९ २३ अथात आदेशो नेति नेति २४ तत्र को मोहः कः शोक एकत्वमनुपश्यत इति २५ जीवेशावाभासेन करोति मा
याचाविद्याचेति २६ तत्त्वमसि २७ गुणाः संजनितकर्माणि गुणोऽनुसृजते गुणान् जीवस्तुगुणसंयुक्तो भुंक्ते कर्म
फलान्यसौ १ यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः नानात्वमात्मनो यावत्पारतंत्र्यं तदैव हि· यावदस्या
स्वातंत्र्यं तावदीश्वरतो भयमिति २ आत्मनो नानात्वमाविवेकमित्याह· यावदिति· यावद्गुणवैषम्यं मायागुणा
नां सत्त्वादीनां वैषम्यं अहंकारं द्विधाभेत्तारं गोरूपं स्यात्· तावदेव नानात्वमित्यर्थोऽन्यत्स्पष्टम् २ किंभद्रं कि
मभद्रंवा द्वैतस्यावस्तुनः कियत् वाचोदितं तदनृतं मनसा ध्यातमेव च· छायाप्रत्याह्वयाभासा ह्यसंतोऽप्यर्थकारि
णः एवं देहादयो भावा यच्छंत्यामृत्युतो भयमिति· द्वैतस्य प्रपंचस्यावस्तुनः खपुष्पसदृशस्य किं भद्रं· वाचेति
यद्वागादिभिरीरितं यच्च मनसा ध्यातं तदनृतं मृषैव च· ननु देहादीनामनृतत्वात्कथं भयहेतुत्वमिति सदृष्टांत
माह· छायेति· छाया प्रतिबिंबं प्रत्याह्वयः प्रतिध्वनिः आभासः शुक्तिरजतादिः यथैतेऽसंतोऽप्यर्थकारिणः ए
वं देहादयो भावा आमृत्युतो भयं यच्छंति मृत्युर्लयः आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः त्रायते त्राति वि
७७ श्वात्मा ह्रियते हरतीश्वरः तस्मान्नह्यात्मनोऽन्यस्मादन्यो भावो निरूपितः निरूपितेयं त्रिविधा निर्मूला भा

न्यमित्यार्थं नेह नानास्ति किंचनेति ४ इह ब्रह्मणि नाना ज्ञातृज्ञेयादिकल्पना नास्तीत्यर्थः यत्र हि द्वैतमि
व भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्तेन कं विजानीयादिति ५ यत्र हि व्य
वहारकाले द्वैतमिव भवति तत्र तदा इतरो जीव इतरं पश्यति । यत्र तु मोक्षकाले अस्य जीवस्यात्मा ब्रह्मैव
सर्वमभूत् तत्र तदा केन कं पश्येदित्यर्थः ५ इतोन्यदार्तं सर्वं ६ यम्हलोकं न विदंत्यन्र तेन रहि प्रज्ञाताः ७ इतो ब्रह्म
णोऽन्यत् जगत् आर्तमित्यर्थः ७ अथ योन्यां देवतामुपास्ते अन्योसावन्योऽहमस्मीति न स वेद यथा प
शुरेवं स देवानामिति ८ अथ ज्ञानानंतरं यः कोप्यसावन्य उपास्यो ऽन्योऽहमुपासकोस्मीति मत्वान्यां
देवतामुपास्ते स श्रुतिनाम्न्यर्थमद्वैतं ब्रह्म न वेद यथा पशुरित्यर्थः ८ यदेवेह तदमुत्र यदमुत्र तदन्विह मृत्योः
स मृत्युमाप्नोति य इह नानेव पश्यति ९ यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवति १० द्विती
याद्वै भयं भवति ११ त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते १२ तद्योऽहं सोऽसौ योऽसौ सो
ऽहम् १३ अयमात्मा ब्रह्म १४ प्रपंचो यदि विद्येत निवर्तेत न संशयः मायामात्रमिदं द्वैतमद्वैतं परमा
र्थतः विकल्पो विनिवर्तेत कल्पितो यदि केनचित् उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते १६ नान्योतोस्ति
द्रष्टा श्रोता मंता विज्ञाता १७ स एवमायापरिमोहितात्मा शरीरमास्थाय करोति सर्वं १८ स रामो

त·सि·
३५

चंद्रयुगपत्तगंधर्वनगरादीनीत्यनेनापिजगतोनित्यत्वंदर्शितं· तथाहि· यथा चंद्रद्वयदर्शनस्यमिथ्यात्वेप्येक
चंद्रद्रष्टुः पुरुषस्यचसत्यत्वं· तथाश्रीरघुनाथस्यजडशक्तेर्नानात्वदर्शनंमिथ्या· जगतोजगद्द्रष्टुश्चजीव
स्यसत्यत्वं· गंधर्वनगरदृष्टांतस्यतात्पर्यमभिप्रायः श्रीरघुनाथस्यजडशक्तेरुपाधिवशाज्ञानंजीवस्यतावदेवना
नात्वेनघटपटादिपदार्थज्ञानंभवति· यदाजडशक्तेर्लीनंतदासाएवशक्तिस्सर्वपदार्थरूपदृश्यते· यथादू
रतोदृष्टेगंधर्वनगरेऽस्यभ्रमोभवति· गंधर्वनगरनिकटगतेमिथ्येति· यस्यनगरस्यभ्रमोगंधर्वनगरेभवति·
तस्यद्रष्टुः पुरुषस्यचसत्यत्वमिति· तथाभगवतोयाजगद्रूपाज[illegible]डशक्तिः सासत्यभूता· नानात्वेनदृश्यमा
नाऽसत्यरूपा· तस्मात्कविर्मनीषीपरिभूः स्वयंभूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यइतिश्रुत्या
ब्रह्मसत्यंतपःसत्यंसत्यंचैवप्रजापतिः सत्याद्भूतानिजातानिसत्यंभूतमयंजगदितिस्मृत्याचजगतोनि
त्यत्वमिति· तस्मादाभासवादोपिगगनकुसुमायमानएवेत्याहुः इतितृतीयसिद्धांतेप्रतिवादिवादोनाम
प्रथमोविवेकः· भोराजकुमार प्रतिबिंबविवर्तावच्छिन्नाभासप्रतिपादिकाः श्रुतिस्मृतयोद्वैतमतेसंगताया
स्तदंगीकृतं· परंतुजीवस्तुब्रह्मैवानेकश्रुतिस्मृतिसूत्रैस्तयोरभेदप्रतिपादनात्· तथाहि· ब्रह्मविद्ब्रह्मैव भव
ति १ ब्रह्मैवसन्ब्रह्माप्येति· २ सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयमिति· ३ अग्रेसृष्टेः प्राक्
७८ सदेवसत्तामात्रंब्रह्मैवासीत्· कीदृशमित्याह एकमेवाद्वितीयं· सजातीयविजातीयस्वगतभेदशून्य

षिसत्वानि दिशोकुमारीन्· सतित्समुद्राश्चस्रेः शरीरं पत्यैश्च भूतं प्राणमेस्तनन्य इति भागवते· एतादशा थीनं
गीकारे एकदृष्टांतेनैव परोक्तार्थसिद्धौ दृष्टांतत्रयं वैयर्थ्यमापद्येत· मत्स्पिंगदिदृष्टांतभुतादिदार्ष्टांतिकयो
श्चनुरात्रत्वाभावात्· कृचित्स्रष्टेः पूर्वनिर्विशेषस्यप्रतिपादनं श्रूयते· नदपितत्वकोशमात्राभिप्रायेरासमो
चीनं· तस्माद्विवर्तवादोमूलशून्य इत्याहुः सोमहाराजकुमार विवर्तवादेनाद्वैतसिद्धिर्मीभूत्· यथासलिलनिभी
सोमरगतस्मात्तुजायते जलोपलब्धमनुग्रराक्षोजाबुद्धिर्जले सतीतिस्मृत्याः मगास्तृषिताः श्चयं धाराः पश्यंति
चउताः संति· यथागंधर्वनगराणीत्सरतोदृश्यंते उपस्त्यनोपलभ्यंते तथा जगदिति योगशास्त्रोतेनच मगतस्मा
यामुदकं शुक्तौ रजतं भुजंगमो रज्जौ नैमिरिकचंद्रयुगपत्स्यंतं न मरीचिलंङ्गमद्रूपमिति शेषनागोज्ञो नावाद्वैतसिद्धिरि
ति भोविप्र· यथासलिलेत्यादिवचनेनाभासवादो निरस्तु विरागापैयेति इतरथाभूततन्मात्रादीनां स्थूलातिरेको
वाश्रूयेत· श्रांतेर विषयत्वात्· विषयस्यभावानां वस्तुनो विनिमयश्च दृश्येतेतिः तस्मात्तेन तेनयचनेन
वादो निरस्तुविरागापैवेति ध्येयनिकेचित्· गुरुचरणास्तुः मगतृष्णापामुदकमित्यादिवचनेनधर्माश्रो तस्य
जीवस्यभ्रांत्सुत्पानादित्वसूचितं· सत्संज्ञानमनंतमिति श्रुत्याब्रह्मणोज्ञानस्वरूपत्वेनतस्यभ्रांत्यसंभवात्· रज्ज्वा
सर्पः शुक्तौरजतमित्यनेनापिजगतोऽनादित्वंसूचितं· सत्यभूतयोरज्जुशुक्तिकयोः सत्यभूतस्यसर्परजतस्या
न्यत्रदृष्टस्यभ्रमोजायते· इतरथासर्परजतज्ञानहीनस्यबालकस्यभ्रमापत्तिस्तथा लोकेनदृश्यते· नैमिरिक

चंद्रयुगपत्तगंधर्वनगरादीत्यनेकानापि जगतो नित्यत्वे दर्शिते · तथाहि · यथा चंद्रद्वयदर्शनस्य मिथ्यात्वेप्येक
चंद्रद्रष्टुः पुरुषस्य च सत्यत्वं · तथा श्रीरघुनाथस्य जडशक्तेर्नानात्वदर्शनं मिथ्या · जगतो जगद्द्रष्टुश्च जीव
स्य सत्यत्वं · गंधर्वनगरदृष्टांतस्यायमभिप्रायः श्रीरघुनाथस्य जडशक्तेर्यावदज्ञानं जीवस्य तावदेव ना
नात्वेन घटपटादिपदार्थज्ञानं भवति · यदा जडशक्तेर्ज्ञानं तदा सा एव शक्तिः सर्वपदार्थरूपा दृश्यते · यथा दू
रतो दृष्टे गंधर्वनगरेऽस्य भ्रमो भवति · गंधर्वनगरनिकटगते मिथ्येति · यस्य नगरस्य भ्रमो गंधर्वनगरे भवति ·
तस्य द्रष्टुः पुरुषस्य च सत्यत्वमिति · तथा भगवतो या जगद्रूपा जडशक्तिः सा सत्यभूता : नानात्वेन दृश्यमा
नाऽसत्यरूपा · तस्मात्त्वा विमर्शनीयो परिभूः स्वयंभूर्याथातथ्यतोऽर्थान् व्यधाच्छाश्वतीभ्यः समाभ्य इति श्रुत्या
ब्रह्मसत्येन तपः सत्यं सत्यं चैव प्रजापतिः सत्याद्भूतानि जातानि सत्यं भूतमयं जगदिति स्मृत्या च जगतोऽनि
त्यत्वमिति · तस्मादाभासवादोपि गगनकुसुमायमान एवेत्याहुः इति तृतीयसिद्धांते प्रतिवादिवादो नाम
प्रथमो विवेकः · भो राजकुमार प्रतिबिंबविवर्तावच्छिन्नाभासप्रतिपादिकाः श्रुतिस्मृतयोऽद्वैतमते संगता पा
स्तदंगीकृतं · परं तु जीवस्तु ब्रह्मैवानेकश्रुतिस्मृतिसूत्रैस्तयोरभेदप्रतिपादनात् · तथाहि ब्रह्मविद्ब्रह्मैव भव
ति १ ब्रह्मैव सन् ब्रह्माप्येति · २ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति · ३ अग्रे स एवः प्राक्
सदेव सत्तामात्रं ब्रह्मैवासीत् · कीदृशमित्याह एकमेवाद्वितीयं · सजातीयविजातीयस्वगतभेदशून्य

सर्व० भणमात्रं· वाग्व्यवहारविषयमात्रं· परमार्थतस्तु कारणभूतं सुवर्णमित्येव सत्यं· तथायेन सर्वोपादानकारण
३४. भूतेन शास्त्रादिना विचारपूर्वकमनेन रामोपासनेन नामतपश्चोपायेन श्रुतेन समतं स्याद्विकारो विविधाकारो नाम
धेयं तत्तदुपादानं नामवाचारंभणं वाग्व्यवहारविषयमात्रं परमार्थतस्तु कारणभूतं श्रीरामोपादानमित्येव स
त्यं· तत्र प्रमाणं: यथा तरो मूलनिषेचनेन तृप्यंति तत्स्कंधभुजोपशाखाः प्राणोपहाराच्च यथेंद्रियाणां त
थैव सर्वार्हणमच्युतेज्येति भागवते कर्मणापधिकृतापेचदेवाः सर्पादयोखिलाः विनाविष्णुस्वातरस्यंत्वापूज
यतो जनात् तानधः पातयंत्यथ संसाराब्धौ पुनः पुनः देवानन्यान्पूजयद्भिरयंहरिन पूजितः देवा विष्णुवर्जितो
कृत्वा पूजोस्त्वीयैर्हतार्पितो· किंचिद्दावादंडयंति संसाराब्धौ पुनः पुनः तस्मात्कर्मणापधिकृतान्पूजयंतः सुरान्
द्विजाः पूजयंतस्तु देतस्यं हरिस्तिष्ठ मया पुपुरीतिवापुपुराणे· यथा सोम्येकेनन खनिकृंतनोपलक्षिते-नकार
णभूतेन कृष्णायसेन कार्यभूतं कार्ष्णायसं सर्वविज्ञातं स्याद्विकारो विविधाकारो नामधेयं खड्गादिवाचारंभणमा
त्रं· वाग्व्यवहारविषयमात्रं· परमार्थतस्तु कारणभूतं कृष्णायसमित्येव सत्यं· तथायेन कारणभूतेन चिद्विग्र
हेण विज्ञातेन कार्यभूतं सर्वजगद्विज्ञातं स्याद्विकारो विविधाकारो नामधेयं तत्तन्नामसरित्समुद्रादिकं वाचारं
७४ भणं वागालंबनमात्रं· परमार्थभूतं चिदचिद्रूपमित्येव सत्यः तत्र प्रमाणं· खं वायुमग्निं सलिलं महीं च ज्योतीं

रणाभूतेन मृत्पिंडेन श्रवणाद्वाराज्ञातेन सर्वमन्मयं घटशरावादिकं तत्कार्य्यजातं विज्ञातं स्यात घटशरावा
दिविकारो विकारो विविधाकारस्तु नामधेयं वाचारंभणमात्रं वाग्व्यवहारविषयमात्रं · परमार्थतस्तु कारणाभू
ता मृत्तिकेत्येव सत्यं तथासत्पद इति पाठेन येन रामनाम्ना सर्वनामकारणाभूतेन श्रुतेन श्रवणाद्वाराज्ञाते
न सर्वकार्य्यजातं नामजातं विज्ञातं स्याद्विकारो विविधाकारो नामधेयं तु वाचारंभणमात्रं वाग्व्यवहारविषयमात्रं · प
रमार्थतस्तु कारणाभूते रामनाम्न्येव सत्यं · रामनाम्नः सर्वनामकारणत्वे प्रमाणं तु · बीजे यथा स्थितो वृक्षः शाख
पत्रैवसं युतः तथैव सर्ववेदाः हि रकारे सुव्यवस्थिताः · यथाकरंडे रत्नानि गुप्तान्यस्तैर्न दृश्यते · तद्वन्मंत्राश्च
हि
वेदाश्च रकारे सुव्यवस्थिताः · आदावंतेनयामध्ये रकारे सुप्रतिष्ठितं विश्वं चराचरं सर्वमवकाशेन नित्यश इति
पुलहसंहितायां · ध · चित्रणावस्थापि सर्वशब्दजनकत्वं श्रूयते तदपि संगतमेव · प्रणवस्यापि श्रीरामस्यैव
नामत्वात् · तत्र प्रमाणं अकाराक्षरसंभूतः सौमित्रिर्विश्वभावनः · उकाराक्षरसंभूतः शत्रुघ्नस्तैजसात्मकः · प्रा
ज्ञात्मकस्तु भरतो मकाराक्षरसंभवः · अर्द्धमात्रात्मको रामो ब्रह्मानंदैकविग्रहः इति रामोपनिषदि · उकारवाच्य
स्त्वं रामवाच्यामविषयः प्रमाणं त्वध्यात्मरामायणे यथा सौम्यैकेन लोहमणिना सुवर्णपिंडेन कारणाभूतेन मते
न विचारितेन सर्वकार्य्यभूतं कटककुंडलादि तत्त्वेन विज्ञातं स्याद्विकारो विविधाकारो नामधेयं कटकादि वाचारं

स·वे· धानेनभवति· यथामत्यिंऽविज्ञानात्सादृश्यदेवमन्मयाः विज्ञायंनेनयाविस्मोः सादृश्याज्जगदेवसीत्यादि
स्मृत्यापमर्थः प्रमाणाभ्यन्तरमितिध्येयमितिमाध्वाः । गुरुचरणास्तुतमादेशमप्राक्षो येनाश्रुतंश्रुतंभवत्यम
३३ तंमतमविज्ञातंविज्ञातमिति· यथासोम्यैकेनल्लोहमणिनासर्वलोहमयंविज्ञातंस्याद्वाचारंभणाविकारो
नामधेयंलोहमित्येवसत्यं· यथासोम्यैकेननखनिकृंतनेनसर्वंकार्ष्णायसंविज्ञातंस्याद्वाचारंभणंविका
रोनामधेयंकृष्णायसमित्येवसत्यमित्युद्दालकोक्तंश्रुत्वाश्वेतकेतुरुवाच· भगवन्नैतन्तेगुरवोऽवेदिष्यन्
यद्यवेदिष्यन्कुतोनामैवोचन्नतोभगवांस्त्वेवमेब्रवीत्विति· तथासोम्येतिहोवाच·सदेवसोम्येदमग्रआ
सीदेकमेवाद्वितीयमिति· अस्यायमर्थः हेसोम्यनामोपासनश्चिदचिद्विशिष्टः सन्नामकएकोऽद्वितीयः श्री
रामचंद्रएवेदमग्रेसृष्टेः प्रागासीदित्यादेशः श्रीरामचंद्रस्यसत्पदवाच्यत्वेप्रमाणंच· आनंदरूपः स
र्वाधिष्ठानः सन्मात्रोनिरस्ताविद्यातमोहोऽहमेवेति संभाव्योऽहमोंतत्सद्यत्परंब्रह्मरामचंद्रश्चिदात्मकइतिरा
मोपनिषदि· सर्वोनमत्यात्सन्नामाहरिर्नारायणः प्रभुः सोऽसृजत्प्रथमंदेवींतेजआख्याश्रियंसतीमिति
सामसंहितायां अग्रेसपरिकरोरामचंद्रएवासीदित्यत्रप्रमाणः नारायणएवेदमग्रआसीन्नब्रह्मान
चशंकरइति। भगवानेकएवासीदग्रआत्मात्मनांविभुरितिभागवते· नचयवंनेचयम्रणामरूपोब्रलपा
७७ परिअनोच्युतोखिलेलोकेभगवान्सर्वगोऽव्ययइतिस्कंदे· तत्रयथायथेंदृष्टांतः यथासोम्यैकेनघा

नामधेयं स्वर्थे धेयप्रत्ययः योवागालंबनमात्रं नामैव कवलं न विकारो नाम वास्त्विति· परमार्थं मृत्तिकेत्येव
मृत्तिकेव सत्यं वास्त्विति· यथा सोम्यैकेन लोहमणिना सुवर्णपिंडेन सर्वमेतद्विकारजातं कटकमुकुटकेयूरादि
विज्ञातं स्यादिति· वाचारंभणमित्यादि समानं· यथा च सौम्यैकेन नखनिकृतनेनोपलक्षितेन कार्ष्णा
यसपिंडेन सर्वं कार्ष्णायसं कृष्णायसो विकारजातं विज्ञातं स्यादिति समानमन्यत्· योविप्र मूलमून्य न निव
र्तेनाद्वैतं मा वदन च विवर्ते उक्तश्रुतय एव प्रमाणमिति वाच्यम्· तासामस्याभिप्रायकत्वात् तथाहि हे
सोम्य एकेन मृत्पिंडेन विज्ञातेन सर्वं मृन्मयं मद्विकारजातं मृत्त्वादिसादृश्यपरेन नाविज्ञातं भवति एक
स्मिन्मृत्पिंडे विज्ञाते सति उपदेशविनैव तेमद्रूपा मृत्पिंडसादृश्याद्यथा ज्ञायंते तथा सत्यत्वादिन भग
वति ज्ञाते सति सत्यत्वप्रामाणिकत्वादिसादृश्याज्जगदपि ज्ञायत इत्यर्थः· भगवतः प्रधानत्वात् जगतोऽ
प्रधानत्वात्· प्रधानज्ञानादप्रधानं ज्ञानमेव भवतीत्येतद् दृष्टान्तेनोपपादयति· वाचारंभणमिति हे सोम्येति
हे सोम्य वाचा वागिंद्रियेणान्नाम्ना संस्कृतेन राघवेशशब्दा नामारंभणं विकारः उत्पत्तिमत् अनन्तानि नामा
नि अनित्यानि च अत एवाप्रधानानि मृत्तिकेत्येव संस्कृतं नामधेयमविकारोऽत एव सत्यमित्यर्थः अ
तोऽनित्यत्वात्संस्कृतं नामधेयं प्रधानं· तथा च प्रधानेन संस्कृतशब्दज्ञानेन यत्फलं भवति· न तत्फलं
भाषाशब्दज्ञानेन भवति तथा प्रधानभूतभगवज्ज्ञानेन यत्फलं भवति· न तत्फलं कर्मदेवतादिरूपजगदप्र

वह्मभूयं प्राप्नोति: यथा घटे भिन्ने आकाशो महदाकाशमेव भवति· यदा जीवस्येश्वरज्ञानं तदा देहेमते व्रह्मप्रा
स· सि· प्तिर्भवतीति· तथाच स्वस्वरूपज्ञानपूर्वकपरमेश्वरज्ञानादेव मुक्तिर्भवति· परमेश्वरप्राप्तोत्य पुनस्त्यतिर्भव
३२ ति· यद्यपमर्थो नस्योक्तियेन· तर्हि ममैवांशो जीवलोके जीवभूतः सनातन इति स्मृतिविरोधः स्यात्· नास्ति
कल्पापत्तिरूपदोषस्तु पूर्ववदेव तस्मात्त्वाच्छपीत्यपः पोषितवेध्यापु तत्तुल्योपमवाच्छिन्नवादइत्याहुः भोराज
कुमार यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं· यथा सो
म्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं लोहमणिरित्येव सत्यं यथा सोम्यैकेन न
खनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं कृष्णायसमित्येव सत्यमिति श्रुतिभ्योऽवि
वर्तेनाद्वैतसिद्धिरस्त्विति· श्रुतीनामर्थस्तुदेशस्य यथा लोके एकेन मृत्पिंडेन करककुंभादिकारणभूतेन विज्ञा
तेन सर्वमन्यद्विकारं ज्ञातं स्यात्· ननु कथं मृत्पिंडे कारणे विज्ञाते कार्य्यमविज्ञातं नैव दोषः कारणानन्यत्वात्का
र्य्यस्य· यन्मन्यसे अन्यस्मिन् ज्ञाते ऽन्यन्न ज्ञायत इति सत्यमेवं स्यात् यद्यन्यत्कारणात्कार्य्यं स्यात् नत्वेवमन्यत्
कारणात्कार्य्यं· कथं तर्हीदं लोके इदं कारणमस्य विकार इति· शृणु· वाचारंभणं वागालंबनमित्येतत्· कोऽसौ
७२ विकारो नामधेयं नामैव नामधेयं स्वार्थे धेयप्रत्ययः· यो वागालंबनमात्रं नामैव केवलं न विकारो नामधेयं नामैव

शे जीवस्य न नाश इति श्रुतेरर्थः एतेन जीवस्य शरीराद्भिन्नत्वं नित्यत्वं च सूचितं नहि यथा घटनाशे आका
शो महाकाशमेव भवति तथा शरीरनाशे जीवो ब्रह्मैव भवतीति श्रुतिर्वक्ति नहि शरीरनाशमात्रं मोक्षकारणं
ऋते ज्ञानान्न मुक्तिरिति श्रुत्या मोक्षस्य ज्ञानाधीनत्वात् नास्तिकतापत्तेश्च तस्मादियं श्रुतिर्जीवस्य ब्रह्मभवनं
नहि वक्ति न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः अजो नित्यः शाश्वतोयं पुराणो न हन्यमाने
शरीरे इति स्मृत्या जीवस्य नित्यत्वात् न ह्यभेदे जीवस्य नित्यत्वं भवतीति किंच एक एवहीत्यादिना ब्रह्मणो
ऽन्तर्यामित्वं प्रतिपाद्य घटसंवृतमाकाशमित्यादिना जीवस्य शरीराद्भिन्नत्वं नित्यत्वं च प्रतिपादितं तदग्रे घ
टवद्विविधाकारं भिद्यमानं पुनः एतन्मयं न जानाति स जानाति च नित्यश इति श्रुत्या जीवब्रह्मणोर्भेदः प्रति
पादितः तथा च पूर्वपरावलोकनेन जीवब्रह्मणोर्भेदपरैवेति सिद्धं श्रुत्यर्थस्तु गीतायां स्पष्ट एवोक्तो भगवता
वहूनि मे व्यतीतानि जन्मानि तव चार्जुन तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतपेत्यादिना घटे भिन्नेत्यादेरर्थ
स्तु यथा विभुत्वेन नित्यादिना ब्रह्म सर्वगतं तथानेकात्वेन नत्वाराणुत्वादिना जीवोपि सर्वगतः नित्यः सर्वगतः
स्थाणुरिति स्मृतेः अनुभवादपि जीवस्य सर्वगतत्वः तथाहि यत्र यत्र विशेषद्रव्यसंयोगस्तत्र तत्र जीवस्य शरीरे
णप्राणसंदृश्यते तथा च जीवस्यापि सर्वगतत्वं अतो यदा जीवस्य स्वरूपाज्ञानपूर्वकेश्वराज्ञानं तदा देहनाशे जी

सं.सि. नएवाभिवाछेदितिसोपपत्तिकंकौशिकभ्रुत्साभिन्नाः जीवाः परोभिन्नस्तथापि ज्ञानरूपतः प्रोच्यंते ब्रह्मरू
३१ पेणवेदसारेषुसर्वशः इति स्मृत्या च तयोः परमार्थदशायां भेदनिगदाद्यद्भिन्नवादोप्यसंगतएव घटसंवृतमि
त्यादेरर्थस्तु यथा घटे लीयमाने सति घटस्यैव लीयते यन्तु घटसंवृतमाकाशं तन्न लीयते तद्भिन्नत्वात् तथा
देहे लीने जीवो न लीयते जन्ममरणादिधर्मरहितत्वात् येनैव जीवस्य नित्यत्वं देहात्पृथक्त्वं च श्रुत्या
प्रतिपादितमिति माध्वाः घटे भिन्ने इत्यादेरर्थस्तु घटे वर्तमानेपि घटाकाश आकाश एव यथा अनावृतत्वात्
तथैव घटे भग्नेपि आकाशस्य घटान्तर्बहिरपि वर्त्तमानत्वात् आकाशं घटः कथामावरणोति एवं देहेत्र
मतेस्वर्तमानेपि अजीवो जीवभिन्नः परमात्मा ब्रह्म सदैव संपद्यते विराजते एतेन परमात्मनः आवरणं कालत्रयेपि
नास्तीति सूचितमिति गौडाः अन्यथा ब्रह्मणोपि भुक्तत्वेन उपाधेरपितत्वात् सर्वस्यावृतत्वेन मुक्तप्राप्यस्य बुद्धस्या
च्छेदेन महानर्थः स्यात् उपाधेर्गमनावस्थायां सर्वगतस्य ब्रह्मणो महाकाशवन्निश्चलत्वेन घटावच्छिन्नकाशस्य
घटगमनेन गमनासंभवत् पूर्वदेशस्य क्षेत्रज्ञाख्य चेतनस्याकस्मिको मोक्षस्तदुत्तरदेशस्थस्य चेतनस्य नित्यमु
क्तस्याकस्मिको बंधश्च पदे पदे स्यातां तस्माद् नादरणीयोयमवच्छेदवादो विद्वद्भिरिति गौडा निंवादित्यानुगा
७१ मिनश्च गुरुचरणास्तु यथा घटे लीयमाने सति घटएव लीयते घटसंवृताकाशस्तु न लीयते तथा शरीरना

र्न्नभवेत् तदा प्रतिबिंबमपि न संभवेत्. किंच ब्रह्मणः प्रतिबिंबमेव न संभवति नयमेने ब्रह्मणो निराकारत्वान्नी
रूपत्वाच्च: नीरूपस्य प्रतिबिंबमन्वे दिग्वायोरपि नथात्वापत्तिः. अच्छेद्यापमतोहितमिति श्रुत्या ब्रह्मणः प्र
तिबिंबस्य प्रतिषेधश्च. किंच प्रतिबिंबजीवस्य जडत्वापत्तिश्च जडत्वे हि कार्य्यकारित्वं न स्यात्. जडस्य कार्य्य
कारित्वे च अग्निद्यापपादाहापत्तिः खड्गाभ्यासेन छेदापत्तिश्च. एतेन बिंबप्रतिबिंबयोरभेदोपि निरस्तः तस्मात्सा
कार एव रामचंद्रः परमात्मान्तर्यामितया सर्वत्र तिष्ठति. यश्चात्मनि तिष्ठन्नित्यादि श्रुतेः तथा च श्रुतिस्मृति
भ्यां द्वैतमतमविरुद्धं. मिथ्यावादिनोऽर्थस्तु गगनकुसुमोपमान इत्याहुः. भो भूमिपकुमार उत्तरीत्या बिंब
प्रतिबिंबभावानुपपत्तिरतः घटसंवृतमाकाशं लीयमाने घटे यथा घटो लीयेत नाकाशं तद्वज्जीवो नभोपमः इ
ति श्रुत्या घटे भिन्ने यथाकाश आकाशः स्यात्तथा पुरा एवं देहे मृते जीवो ब्रह्म संपद्यते तदा इति स्मृत्या चाव
च्छिन्नेन जीवब्रह्मणोरैक्यात्तस्य मद्वैतस्य गगनकुसुमोपमानत्वमिति. श्रुतिस्मृत्योरर्थस्तु यथा घटे लीय
माने सति घट एव लीयते. यत्तु घटसंवृतमाकाशं तु न लीयते तथा नभऽभपमो जीवोन्तष्करणे लीने न
लीयते ब्रह्मत्वात्. घटे भिन्ने सति घटाकाशो महदाकाशमेव स्यात् एवं देहे मृते सति जीवो ब्रह्म संपद्यत इति.
भो द्विज भिन्नो चित्पः परमो जीवसंघास्मृताः परो जीवसंघोऽस्य पूर्त्तः यतस्त्वसौ नित्यमुक्तो ह्यपंचबंधान्मोक्षसे न

पापत्तिः स्यादितिमाध्वाः स्वतेरर्थस्तु॰ पुरुषोजीव आत्मानं स्वमेकमपिमोक्षदसायांबंदशायांच द्विधाभू
तमीक्षेत॰ यथादर्शचक्षुषोः आदर्शमणिमयदर्पणंयथोचितप्रमाणांसंपूर्णतेजस्कंमहांतमचंलमीक्षेत
चक्षुषि तु अल्पप्रमाणमल्पतेजस्कमतिक्षुद्रं चंचलमीक्षेत यथैकस्यापि द्विधाभूतत्वमुपाधिधर्मलिप्तत्वा
लिप्तत्वाभ्यां भेदमीक्षेत तथैवावयोः परमात्मानोः सदैवद्विधाभूतयोरंतरं भेदं सदैवेक्षेत अंतरमवका
शावधिपरिधानांतर्द्धिभेदतादर्थ्ये इत्यमरकोशादंतरशब्दो भेदवाची॰ अहं देहमध्ये परमात्मस्वरूपेणाव
र्ते॰ त्वं च जीवस्वरूपेणावर्तसे न अहं त्वतो निरुपाधिरपि स्वेच्छयासकललोकदेहगतः सन् अंतर्यामी स्वय
थोचितप्रमाणः संपूर्णतेजस्को महान्निश्चलो मुक्तो जीवस्य सदैव निर्लेप एव॰ त्वं तु जीवो ऽल्पप्रमाणएवाल्प
तेजस्कोतिक्षुद्रः सदैवोपाधिधर्मग्रस्तः कदाचिदेव मुक्तिदशायामलिप्त इति सदैवावयोर्भेदं जानीयादिति
गौडाः गुरुचरणास्तु॰ यथा पुरुषः शरीरी एकमात्मानं शरीरमदर्शचक्षुषोः द्विधाभूतं नानाप्रकारमवेक्षेत॰
परमार्थतस्तु॰ शरीरतस्तत्प्रतिबिंबयोरभेदेपि शरीरशरीरिणोस्तु भेद एवेति भावः एवमज्ञानरूपेदर्पणेशरीरस्य
मृद्दारुजडानां चेतनानां च शरीरिणां भेद एव तथैवांतरमावयोरस्तु तत्र दृष्टांतेपि भेदमेव दृढीकरोति। अन्यथा
तथैवाभेदश्चावयोरस्त्विवदेत यद्ययमर्थो निस्यात् नहि महान्दोषो भवेत्॰ तव मते भूतनो मिथ्यात्वेन पर
मात्मा कथमवस्थितो भवेत्॰ यदि जीवोपि नास्ति तदा परमात्मानं बहुप्रकारं तथा कः पश्येत् यदा च जलाद्युपाधि

दानेद विग्रहमिति पंचरात्रे· इति श्रीमहाराजकुमार श्रीविश्वनाथसिंहविरचिते सर्वसिद्धांते द्वितीयः सिद्धान्तः ॥ ० ॥

मो महाराजकुमार ॥ यदुक्तं नामादीनां नित्यत्वं तदंगीकृतमस्माभिर्यदुच्यते सर्ववेदशास्त्रे सर्वमतसंमतत्वं मदाचार्यद्वैतमतस्य तत्कथं न विरुध्यति प्रतिविंवादिप्रतिपादकश्रुतिस्मृतिविरोधात्· तथाहि· एक एव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचंद्रवदिति· यथा पुरुष आत्मानमेकमादर्शचक्षुषोः द्विधाभूतमवेक्षेत तथैवान्तरमावयोरिति: श्रुतेरर्थस्तु हीति निश्चये एवकारस्तु द्वैतव्यावृत्त्यर्थः भूते भूते व्यवस्थितः एको भूतात्मा उपाधियोगेन बहुधा नाना जीवरूपेण दृश्यते· तद्विनाशे त्वेकधा स्वस्वरूपेणाद्वैतेनैकप्रकारो दृश्यते तत्र दृष्टांतः जलचंद्रवदिति· यथैक एव चंद्रो जलाद्युपाधियोगान्नानारूपेण दृश्यते· तद्विनाशे त्वेकस्वरूपेण दृश्यत इति· स्मृतेरर्थस्तु यथा पुरुष आदर्शचक्षुषोरेकमात्मानं द्विधाभूतमवेक्षेत पश्येत् तथैवावयोरंतरमिति· तथा चोक्तश्रुतिस्मृतिभ्यां जीवस्य मिथ्यात्वात् हि रूढं द्वैतमिति· भो द्विज· यदुक्तं श्रुतिस्मृतिभ्यां द्वैतमतं विरुद्धमिति तदपेशलं तयोरन्याभिप्रायकत्वात्· तथाहि· यथा जलेनानात्वेन दृश्यमानः चंद्रः स्वकीयव्याप्यजलं भासयः तच्चैव संवर्द्धयति न तु स्वयमपि तद्गतद्रवत्वेन लिप्त आर्द्रीभावमाप्नोति· तद्वत्परमात्मापि भूते भूते आत्मा व्याप्त्या व्यवस्थितस्तद्धर्मैरस्पृष्ट एव दृश्यत इति श्रुतेरर्थः इतरथा सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्य इति श्रुतेर्व्याकी

मं चैनैमिषं तोताद्रिं पुष्करं चैतन्नरनारायणोनया अष्टौ मे मूर्त्तयः सन्ति स्वयंव्यक्ता महीतले इति वायुपुराणो
क्तें प्रमाणं· ज्ञानं सर्वदा सर्वत्र सर्वविषयकपरोक्षाभावः। यः सर्वज्ञः सर्ववित् परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया चेत्यादिकमत्रमानं· इदमनिष्टनिरसनपूर्वकेष्टप्रापणात् पाश्रितकार्योपयो
गि शक्तिर्नाम जगदुत्पादनभावप्रयुक्तमघटितघटनासामर्थ्यात् तदुक्तं जगत्प्रकृतिभावो यः सा शक्तिः परिकी
र्त्तितेति· निस्संसारिणो निस्सत्वरिपरिषत्संघट्टने ऽसामर्थ्यशंकानिरासः शक्तेः प्रयोजनं· पूर्त्तिर्नाम नारा
यणात्वप्रयुक्तसमस्तगुणविभूतिमत्त्वमवाप्तसमस्तकामत्वमितियावत्· यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयते
पि वा अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इति स्वकार्य्यघातिनि भगवति स्वस्याकिंचित्करत्वसामर्थ्यप्र
युक्तस्वकार्यासिद्धिशंकानिरासे पूर्त्तेरुपयोगः प्राप्तिर्नाम निरुपाधिकशेषित्वं· न ह्यसमस्तवस्तुव्याप्तिनातिश
याश्रयत्वं· अतः स्वामित्वशेषित्वयोः नापौनरुक्त्यं मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्यसि
सत्यं ते प्रतिजाने प्रियोऽसि मे· अस्य प्रयोजनं भगवतः स्वाश्रितकार्य्यस्वकार्य्यमिति प्रतीतेस्तस्य स्वकार्य्य
करणे प्राप्तभावसंकाव्युदासः अत्र कारुणिकत्वाभावे ज्ञानेकात्स्र्ये नापराधपरिज्ञानापशक्तिर्नाम यथापरा
धदंडापादनाय· पूर्त्तिः प्राप्तिश्चासमुंजसा यविनतपुत्रत्यागापरवत्यादिति ज्ञानशक्त्यादीनामाश्रितानुग्रहो
पयोगित्वार्थं कारुणिककृतापनुत्तये पेतिदिव्यरामस्य गुणारूपं च लीलाधाम परात्परं एतच्च तुष्पनिपसद्धि

ग्रंथभूयस्त्वभयान्नलिखिताः येगुणालिखितास्तत्रस्वल्पादिव्या अनंताश्चबोध्याः तेषांमध्येसप्रयोजना
अष्टगुणास्तुलक्षणानिचोच्यंते· वात्सल्यसौलभ्यस्वत्वज्ञानशक्तिपूर्तिप्राप्तपरति· तत्रवात्सल्यंनामदोषभोग्य
त्वेदोषादर्शित्वमित्येके· तत्रप्रमाणं अंगुष्ठमात्रःपुरुषोमध्य आत्मनितिष्ठति· ईशानोभूतभव्यस्य
नततोविजुगुप्सते· मित्रभावेनसंप्राप्तंनत्यजेयंकथंचन· दोषोयद्यपितस्यस्यात्सतामेतदगर्हितं· अपि
ज्ञातासहस्रान्नुरित्यादि स्वापराधानुसंधानप्रयुक्तभगवज्जनितभयनिवर्तकपयोगि वात्सल्यं स्वामित्वंना
म स्वव्यतिरिक्तसमस्तवस्तुस्वकीयत्वाभिमानः स्वत्वमात्मनिसंजातं स्वामित्वंब्रह्मणिस्थितं· उभयोरे
वसंबंधोनयोरभिमतोभवेदितिपाद्मवचनात्· मत्कार्यमयमसंशयंकरिष्यतीतिप्रत्ययापायस्वामित्वं· शीलंस्व
भावः शीलंस्वभावेसद्वृत्तइत्यनुशासनात्· शोभनंशीलंस्वभावोयस्यतस्यभावः सौशील्यं अहोभाग्यम
होभाग्यंनंदगोपव्रजौकसामित्यादिकमनुसंधेयं भगवतितस्यचनिकृष्टत्वाऽनुसंधानजनितानभिगम्य
त्वभजननिवृत्तिरस्यप्रयोजनं सुलभस्यभावः सौल~~भ्यस्वभावः~~भ्यं· नमांसचक्षुरभिवीक्षते ध्यानमित्युक्तरीत्या
मांसचक्षुर्विषयस्यतद्विषयतामापद्यनित्यसंनिहितत्वं· अहंवोबाधवोजातः सुहृदःसर्वदेहिनामित्या
दिकमत्रमानं ९ नारायणःपरःसाक्षाद्वैकुंठनिलयःसदा· अर्चावतारतोप्राप्तोभक्तानोहितकाम्यया· भ
गवद्दौर्लभ्यभजननिवृत्तिरस्यप्रयोजनं श्रीमदायेस्वयंव्यक्तोविमानंरंगसंज्ञिकं· श्रीमुष्णंवेंकटाद्रिंचशालग्रा

स्मिन्गुणाइतिश्रुतिः ~~[illegible]~~ समस्तकल्याणगुणात्मकोसावित्यादिस्मृतिः नांतंगुणानाम गुणस्यजग्मुर्योगेश्वरायेभवपाद्ममुख्याः आत्मारामाश्चमुनयोनिर्ग्रंथाअप्युरुक्रमे कुर्वंत्यहैतुकींभक्तिमित्थंभूतगुणोहरिः इदंहिपुंसस्तपसः श्रुतस्यवास्विष्टस्यसूक्तस्यचबुद्धिदत्तयोः अविच्युतोर्थः कविभिर्निरूपितोयदुत्तमश्लोकगुणानुवर्णनं निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात् कउत्तमश्लोकगुणानुवादात्पुमान्विरज्येतविनापशुघ्नात् हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः अध्यगान्महदाख्यानंनित्यंविष्णुजनप्रियम् इतिभागवते· यः सर्वज्ञः सर्वविद्यस्यज्ञानमयंतपः परमात्मापहतपाप्माविज्वरोविशोकोविमृत्युरितिश्रुतिः ईश्वरेपिगुणाः प्रोक्ताः सच्चिदानंदलक्षणाः नित्याः सर्वगताश्चैवरतिवेदविदोविदुः स्वरूपभूतानपितान्येनजानंतिवैजनाः मुखंतेषांभिदिसायस्मैतंस्मामामावैरादितिपंचरात्रे सत्यंशौचंदयाक्षांतिस्त्यागः संतोषआर्जवं शमोदमस्तपः साम्यंतितिक्षोपरतिः श्रुतं· ज्ञानंविरक्तिरैश्वर्यशौर्यतेजोबलंस्मृतिः स्वातंत्र्यंकौशलंकांतिर्धैर्यमार्दवमेवच· प्रागल्भ्यंप्रश्रयः शीलंसहओजोबलंभगः गांभीर्यस्थैर्यमास्तिक्यंकीर्तिर्मानोनहंकृतिः इमेचान्यचभगवन्नित्यायत्रमहागुणाः प्रार्थ्यामहत्त्वमिच्छद्भिर्नवियंतिस्मकर्हिचित्· इत्यपिभागवते· अन्येगुणाभक्तिरसामृतसिंधुवाल्मीकीयरामायणादौप्रसिद्धा

सर्वशास्त्रेष्वीश्वरस्य निर्गुणत्वप्रतिपादनं श्रूयते तथाहि· साक्षी चेता केवलो निर्गुण~~[illegible]~~श्चेति श्रुतिः
प्रकृतेः परमीशानं निर्गुणं नित्यविग्रहं परमानंदरूपं च परमानंदकारणं परं प्रधानं पुरुषं निर्गुणं प्रकृतेः प
रमिति स्मृतिः· निर्गुणं निरहंकारं जननमिति सदाशिवसंहितायां तस्मात्कथं गुणानां नित्यत्वमिति· भो भिक्षुका
चार्य्य श्रुतिस्मृतिभ्यामीश्वरो निर्गुणः इति प्रत्युति पादितं न तयोस्तात्पर्य मध्येव श्रुतिस्मृत्योः प्राकृतगुणा
रहिते दिव्यगुणवत्वे च तात्पर्यं· तत्र प्रमाणं योसौ निर्गुणः इत्युक्तः शास्त्रेषु जगदीश्वरः प्राकृतैर्हेयसंयुक्तैर्गु
णैर्हीनत्वमुच्यते इति पाद्म· रहितः प्राकृतैर्हेयैः सत दिव्यगुणोदधिः सत्वादयो न संतीशे यत्र च प्राकृता गुणा
इति च केचिदज्ञानवशेन याद्वनादेव शास्त्रेन त्वमविज्ञायेश्वरे नैर्गुणापवदंति तेषां तु महादोषश्रवणं· तथा
हि· शास्त्रे स्वयुध्वानतेन केचिद्दांबलाज्जनाः कामद्वेषाभिभूतत्वादहंकारवशंगताः पाषानव्यमवि
ज्ञाय शास्त्राणां शास्त्रस्य वः श्रुतस्ते नानिरारं भावं ममोहवशानुगाः नैर्गुण्यमेव पश्यंति न गुणाननुपुञ
ने रत्यादि भाइने दिव्यगुणवत्वे प्रमाणं कौशल्याजनन यद्धामदिव्यलक्षणसंपन्नमितिरामायणे· अनंतगुणगं
भीरः शांतो दांतो गुणाकरः इति तद्वाचमते· सविश्वकृद्विश्वकृदात्मयोनिर्ज्ञः कालकालो गुणी सर्वविद्यः प्रधा
नक्षेत्रज्ञपतिर्गुणेशः संसारबंधस्थितिमोक्षहेतु रिति श्वेताश्वतरोपनिषदि· अथ कस्मादुच्यते ब्रह्मेति बृहंतोह्य

स०वि० तः सर्वेशः सर्वसेव्योऽनन्तो गोपकन्यासमावृतः गोवर्द्धनगिरिस्तत्र यत्रैव देवः प्रतिष्ठितः इति सदासिवसंहितायां·
२९ जलरूपेण ब्रह्मैव तत्र प्रमोक्षदा सदा· नैवात्र कर्मणां भोगो रामरूपो भवेन्नरः यदा मतिं प्रकुरुते ह्ययोध्यागम
ने प्रति· तदा नरयानिर्मगाम्न गायंति पितरो दिवि यस्याः प्रभावमतुलं ब्रह्माद्यैर्दर्शितो ह्यहं· नहि वक्तुं समा
र्थोऽस्ति यित्सु ब्रह्मसगुणः पुमाननितिस्थितिः देवानां पूरयोध्या तस्यां हिरामयः कोशः स्वर्गो लोकोज्योतिषा
वृता यो वै तां ब्रह्मणो वेदामृतेनावृतां पुरीं तस्मै ब्रह्म च ब्रह्म च आयुः कीर्तिं प्रजां ददुरिति तैत्तिरीये यत्तत्सूक्ष्म
परमं वेदितव्यं नित्यं पदं वैष्णवमामनंति एतन्न स्त्रीकाम विदुर्लोके सारं विदिदं इति तत्त्वावबोधयोग निष्ठा इति पि
प्पलादशाखायां· येन गानायं निहितं गुहायां विभ्राजते यद्यतयो विशंतीति परस्यां शाखायां तद्धाम तत्परमं यथा
ममैत्रराजाध्यापकस्य यत्र न दुःखादि न सूर्यो भाति यत्र न वायुर्वाति यत्र न चंद्रमा भाति यत्र न नक्षत्राणि भांति यत्र
न मृत्युः प्रविशति यत्र न दोषस्तदानंदं शाश्वतं शांतं सदाशिवं ब्रह्मादिवंदितं योगिध्येयं यत्र गत्वा न वर्त्तंते
योगिनस्तद्विष्णोः परमं पदं सदा पश्यंति सूरयः दिवीव चक्षुराततं तद्विप्रासो विपन्यवो जागृवांसः समिंध
ते विष्णोर्यत्परमं पदमिति नृसिंहतापिन्याम· छांदोग्योपनिषच्छ्रुतिप्रमाणां तु तृतीयसिद्धांते वक्ष्यते· इति श्रीसर्व
२९ सिद्धांते धामनिरूपणं चतुर्थो विवेकः ॥०॥ श्रीमहाराजकुमार धामनिरूपणमंगीकृतमस्माभिर्गुणानां कार्यं नि

याचहृदये मायापुरीं पुरापदं॥ श्रीवामूलमुदारहेरं तिमथुरानामाग्रवाराणसीमेतद्भ स्वपदं वदंति मुनयो यो
ध्यापुरीमस्तके मथुरायाः पुरः सर्वा अयोध्यापुरदासिका अयोध्यामेव सेवंते प्रलये प्रलयेपि च अयो
ध्यावासिनः सर्वे जगन्नाथस्य मूर्तयः वैकुंठे परमाकाशे नित्यमुक्तैकसेविनः नैव नैवापमानं दो गोलोके
पि परात्परे इति वसिष्ठसंहितायाम्॥ इक्ष्वाकूणां पुराप्रोक्तं पार्वत्यै स्वेनुचैकदा सरयूविरजामध्येऽवधि
ग्रामो वसुंधरो अमरामतिमिछंनिकाकथाइनदेननाः इति वाराहपुराणे मन्वंतरसहस्रेषु काशीवासेन
यत्फलं तत्फलादधिकं प्रोक्तं सरयूदर्शने कृते॥ प्रयागे यो नरो गत्वा माघाने द्वादशं वसेत् तत्फलं दधिकं प्रो
क्तं सरयूदर्शने कृते मथुरायां कल्पमेकं वसते मानवो यदि॥ तत्फलादधिकं प्रोक्तं सरयूदर्शने कृते गयायां
देन यत्पु[illegible]पं पुत्रो तन मदर्शने॥ तत्फलादधिकं प्रोक्तं सरयूदर्शने कृते॥ पुष्करेषु नरो याति कार्तिक्यां कृति
कायते तत्फलादधिकं प्रोक्तं सरयूदर्शने कृते इत्ययोध्यामाहात्म्ये अन्यच्च॥ षष्टिवर्षसहस्राणि काशीवासे
षु यत्फलं तत्फलं निमिषार्द्धेन कलौ दाशरथेः पुरि॥ अन्यच्च॥ यस्यामाति प्रमोदकाननवनरामस्य लीलास्पदं यत्र
श्रीसरितां वराच सरयूरत्नाचलेशोभते॥ ध्येया ब्रह्ममहेशविष्णुमुनिभिर्यानंददा सर्वदा सायोध्या परमात्मनो
विजयते धाम्नां पुरी मुक्तिदा॥ साकेत पश्चिमद्वारा वृंदावनमदूरतः गोगोरोरायतः श्रीमानक्षराद्धगुणविनो रघु

रंनित्यजाग्रतस्वप्नादिवर्ज्जितं हिरण्मयंमोक्षपदंब्रह्मानंदसुखावहं समन्ताधिरहितमाद्यंतरहितंशुभंत्रिपादव्याप्तिः
परंधाम्नीपादोस्येहाभवत्पुनः त्रिपाद्विभूतिर्नित्यंस्यात् अनित्यंपादमैश्वरम् एवमादिगुणोपेतंतद्विष्णोःप
रमंपदं नतद्भासयतेसूर्योनशशीनोचपावकः यद्गत्वानंनिवर्त्तंतेतद्धामपरमंहरेः तद्विष्णोः परमंधामशाश्वतंनि
त्यमव्ययं नहिवर्णयितुंशक्ताः कल्पकोटिशतैरपि हरेः यदैवर्णयितुंशक्यंनमयालोकश्च्यते निःश्रेयसंचनि
र्वाणंकैवल्यंमोक्षउच्यते अष्टाङ्गभक्तिसैवैकांतभोगविवर्ज्जिताः महात्मानोमहाभागाभगवत्सादसे
वकाः तद्विष्णोः परमंधामयांतिब्रह्मसनातनं नानाजनसमाकीर्णंवैकुंठंतद्धरेः पदमितिचपद्मपुराणे ए
तावत्येवत्रिपाद्विभूतिः तदूर्ध्वंगोलोकः तथाचब्रह्मवैवर्त्ते वैकुंठंपरमंधामजरामृत्युहरंपरं वायुनाधार्य्यमा
णंचब्रह्मांडादूर्ध्वमनंतम् ॥ ऊर्ध्ववैकुंठतोगम्यंपंचाशत्कोटियोजनमिति श्रुतिरपि पादोऽस्याविश्वाभूता
नित्रिपादस्यामृतंदिवि त्रिपादूर्ध्वउदैत्पुरुषइति गोलोकादपिश्रेष्ठाअयोध्याः गोलोकाञ्चपरंज्ञेयंसा
केतान परंप्रिये गोप्यागोप्यतरंगोप्यासायोध्यामोवदस्त्रमे इति महारामायणे शिववाक्यं गोलोक
स्तुदेशः वृंदावनादिस्थानं अयोध्यानगरी वैकुंठादीनामुत्पत्तिः साकेतलोकादेवेत्यग्रिमभागेनप्रपंचित
मिति धाम्न परत्वेप्रमाणांतराण्यपि विष्णोः पादमवंतिकांगुणावतींमध्येतुकांचीपुरींनाभौद्वारवतींत

त्ति शिवस्यपुरतोवहिः एतस्माद्बहिरावर्त्तिःसप्तावरणसंज्ञकाः ब्रह्माडादूर्ध्वेतदूर्ध्वेकोटिपंचाशतञ्चामादश
गुणात्परं भूमिरापोनलोवायुः खमहं चत्रिधापरं प्रकृतेर्महतामूलेनसप्तावरणसंज्ञकाः तदूर्ध्वंसर्वतत्त्वानां
कार्यकारणमानिनां नित्यंपरमंदिव्यमहावैष्णवंसंतत्र· सहस्रमूर्द्धाविश्वात्मासहस्राक्षः सहस्रपात·
यन्निमेषाज्जगत्सर्वलयीभूतव्यवस्थितं· उन्मेषेतिविनश्यंतिकालकलज्ञानविडंवनैः यदंशेनमहाभूतो
ब्रह्मविष्णुमहेश्वराः एतऊंसमाख्यानंददातुवांछितंहिनः तदूर्ध्वंतुपरंदिव्यंसत्यममप्यवस्थितम॥न्या
सिनांयोगिनांस्थानंभगवद्भावनात्मनां महाशंभुर्मोदतेत्रसर्वशक्तिसमन्वितः तदूर्ध्वंतुपरंकांतंमहावैकुं
सत्तिकं वासुदेवादयस्तत्रविहरंतिस्वमायया· तदूर्ध्वंस्वपमाभातिगोलोकः प्रकृतेःपरः· वाङ्मनोगोचराती
तोज्योतीरूपः सनातनः तस्यमध्येपुरंदिव्यंसाकेतमितिसंज्ञया· योषिद्रत्नमतोत्तमप्रमदागणसेवित मित्या
